# द्वितीयः सर्गः

इदानीं द्वितीयसर्गस्यारम्भः —

अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः ।
वचसामपि गोचरो न यः स तमानन्दमविन्दत द्विजः ॥१॥

अथ पश्चात् स पूर्वोक्तो[1] द्विजः पक्षी हंसस्तमानन्दं हर्षमविन्दत, अन्वभवत् । य आनन्दो वचसामपि[2] वाचामपि[3] न गोचरो न विषयो निरवधित्वात् । किं कृत्वा? अधिगत्य[4] प्राप्य । काम्? मुक्तिं मोक्षणम् । क[5][44 a]स्मात्? जगत्यधीश्वरात् । जगती भूस्तस्या अधीश्वरोऽधिराजस्तस्मात् । तथा कीदृशात्? ततः पुरुषोत्तमात्, तादृशात् पुरुषश्रेष्ठादिति प्राकरणिकोऽर्थः ।

उक्तिलेशेन त्वर्थान्तरं — स द्विजो ब्राह्मणस्तमानन्दं सुखमविन्दतोपलेभे । य आनन्दो वचसामपि[6] न गोचरो, निरतिशयत्वात् न वाचां विषयः । किं कृत्वा? ततस्तस्माद् दवीयसः पुरुषोत्तमात्[7] श्रीवासुदेवात् मुक्तिं मोक्षं कैवल्यमधिगत्य लब्ध्वा[8] । कीदृशात्[9]? अधीश्वरात्[10] । अधिष्ठातुः प्रेरकात् । क्व? जगति विश्वे । आत्मस्वरूपतया[11] हि भगवान् वासुदेवः सर्वमिदम[12]धितिष्ठति । निरतिशयसुखाभिव्यक्तिर्मुक्तिः ॥१॥

तस्य कियतीमपि चेष्टां तिर्यग्जातिरूपामाह —

अधुनीत खगः स नैकधा तनुमुत्फुल्लतनूरुहीकृताम् ।
करयन्त्रणदन्तुरान्तरे व्यलिखच्चञ्चुपुटेन पक्षती ॥२॥

स खगो हंसस्तनुं मूर्तिमेकधा नाधुनीत । अपि तु बहुधा व्यधुवत् ।

---

1. B2. पूर्वो-
2. B2. -सारेपि.
3. B2. om. वाचामपि.
4. B2. -गत.
5. B2. तस्मात्.
6. B2. -सोमपि.
7. B1. -त्तमात्.
8. B1. लब्धा.
9. B2. कीदृशः
10. B2. दवी-
11. B1. -तनया.
12. B2. -विद्-

अथवा नैकधेति समासे न लोपस्त्वनित्यस्तत्र क्वचिद् ग्रहणात् । कीदृशीं तनुमिति तां विशिनष्टि । उत्फुल्लेत्यादि । उत्फुल्लानि विकसितानि तनूरुहाणि रोमरूपाः – पक्षा यत्र सा उत्फुल्लतनूरुहा[1], उत्फुल्लतनूरुहैः[2] कृता, उत्फुल्लतनूरुहीकृता, ताम्[3] । तथा न परमेतदेव व्यधात् । किञ्च चञ्चुपुटेन चञ्च्वग्रयुगलेन पक्षती पक्षमूल-द्वयं व्यलिखद् विलिलेख अकण्डूयत । कीदृशौ पक्षती ? करेत्यादि । करयोर्यन्त्रणं युक्तितो धारणं तद्वशाद् दन्तुरे उन्नतायतनते[4]ऽन्तरे मध्ये ययोस्ते तथा । पक्षतिश्च पक्षतिश्च पक्षती ॥२॥

अथमेकतमेन पक्षतेरधिमध्योर्ध्वगजङ्घमङ्घ्रिणा[5] ।
स्खलनक्षण एव शिश्रिये द्रुतकण्डूयितमौलिरालयम् ॥३॥

अयं हंसः स्खलनक्षण एव करसंपुट[6]विश्लेषसमय एवालयं स्वस्थानं शिश्रिये भेजे । कीदृशः ? द्रुतेत्यादि । द्रुतं सत्वरं कण्डूयितो निःखर्जूकीकृतो मौलिर्मूर्धा येन स तथा । केन ? एकतमेन[7] एकेनैवाङ्घ्रिणा चरणेन । कथं यथा स्यात् ? पक्षतेः पक्षमूलस्याधिमध्योर्ध्वगजङ्घमधिमध्यं मध्यमधि लक्षी-कृत्य ऊर्ध्वगा उपरिगामिनी जङ्घा प्रसृता यत्र कण्डूयने तत् तथा । मौलि-रत्र चूडास्थानम् । तथा च । चूडा किरीटं केशाश्च संयता मौलयस्त्रयः । 'अङ्घ्रिणा' इत्यत्र कवर्गचतुर्थो वा । दृश्यते च यथा[8] सूर्यशते (६ . सू . श)–

शीर्णघ्राणाङ्घ्रिपाणीन्व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्
दीर्घाघ्रातानघौघैः[9] पुनरपि घटयत्येक उल्लाघयन् यः ।
घर्मांशोस्तस्य वोऽन्तर्द्विगुणघन[10]घृणानिघ्न-[44.6]-निर्विघ्नवृत्ते-
-र्दत्तार्घाः[11] सिद्धसङ्घैर्विदधतु घृणयः[12] शीघ्रमंहोविघातम् ॥ इति ॥३॥

---

1. B1. अनुत्फुल्ल– B2. उत्फुल्ल–
2. B1, B2. –रुहा.
3. B2. om. ताम्.
4. B2. –नतेनान्तरे.
5. B1. अङ्घ्रिणा.
6. B1. –संपुल.
7. B2. om. एकतमेन
8. B2. तथा.
9. B2. –घौघैः;
10. B2. –घनघटना निर्विघ्न–
11. B2. –वृत्तार्घाः, E. –दत्तार्थाः
12. B1. वृणयः.

स गरुद्गुनदुर्गदुर्ग्रहान्कटु कीटान्ददशतः सतः क्वचित् ।
जुनुदे तनुकण्डुपण्डितः पटुचञ्चुपुटकोटिकुट्टनैः ॥४॥

स हंसः कीटान् जुनुदे व्यजयत् । कैः ? पट्विन्त्यादि । पटूनि स्पष्टानि चञ्चुपुटकोटेः चञ्च्वग्रयुगलमुखस्य कुट्टनानि ताडनानि तैस्तथा । किं कुर्वतः [1]सत इत्याह । कीटान् क्वचित् क्वापि देहैकदेशे कटु [2]सव्यथं यथा भवत्येवं दशतो दंशवद् भक्षयतः । सतो वर्तमानात् । कीदृशानित्याह । गरुद्गुनेत्यादि । गरुतां पक्षाणां वनं गहनं, तदेव दुर्गं दुःसञ्चरं स्थानं, तद् वशाद् दुर्ग्रहा दुर्ग्रहयास्तान् तथा । कीदृशः स इत्याह । तनुकण्डुपण्डितः । तनोः कण्डूः कण्डू-यनं, तत्र पण्डितो विज्ञः स तथा । [3]तनुकण्डेति पाठे कण्डनं कण्डस्तत्र पण्डितः । कण्डनं कुट्टनमित्यर्थः ॥४॥

अथमेत्य तडागनीडजैर्लघु पर्यवियतलाथ शङ्कितैः ।
उदडीयत वैकृतात्करग्रहजादस्य विकस्वरस्वरैः ॥५॥

अथ हंसः तडागनीडजैर्जलपक्षिभिर्लघु क्षिप्रमेत्य आगत्य पर्यवियत [4]परिवृतो वेष्टित इत्यर्थः । अथ पश्चाद् विकस्वरैर्[5]विकाशिभिः स्वरैः काकु-वासितैरुपलक्षितैः सद्भिरुदडीयत उड्डीनमिति भावे । यतः कीदृशैः ? शङ्कितैर्भीतैः । कस्मात् ? अस्य हंसस्य करग्रहणा[6]जात् पाणियन्त्रणभवात् । वैकृताद् वैरूप्यात् । विकस्वरस्वरैरिति समासो वा । उपलक्षणे तृतीया ॥५॥

वहतो बहुशैवलक्ष्मतां धृतरुद्राक्षमधुव्रतं खगः ।
स नलस्य ययौ करं पुनः सरसः कोकनदभ्रमादिव ॥६॥

---

1. B1. सतः कीटान् इत्याकु.
2. B2. व्यर्थं.
3. B. ननु -
4. B1. परिवेष्टित.
5. B1. विकासिभिः
6. B1. -ग्रहजात्.

स हंसः पुनर्भूयो नलस्य करं हस्तं ययौ प्राप। स्वयमेवेति 15श्रीपः।
उत्प्रेक्ष्यते। कोकनदभ्रमादिव, रक्तोत्पलभ्रान्तेरिव। कस्य? सरसस्तडागस्य।
जले विषये सरसो भ्रान्तिरित्याह। तत्र शब्दच्छलेन हेतुमाह। किं कुर्वतो
नलस्य? वहतो धारयतः। दधतो वा पाठः। काम्? बहुशैवलक्ष्मताम्।
बहु प्रचुरं शैवलं सेवालं यत्र सा बहुशैवला, एवंभूता क्ष्माभूर्यत्र[1] तद्
बहुशैवलक्ष्मं, तस्य भावो बहुशैवलक्ष्मता, तां तथा। सरस्ययं धर्मो युक्तः।
तत्त्वतस्तु बहूनि शैवस्य शिवभक्तस्य लक्ष्माणि[2] चिह्नानि यस्य स बहु-
-शैवलक्ष्मा, तस्य भावस्तत्ता, तां तथा। करे कोकनदभ्रमे हेतुमाह।
कीदृशं करम्? धृतेत्यादि। धृता रुद्राक्षा मधुव्रताश्च येन स धृतरुद्राक्ष-
-मधुव्रतस्तं तथा। रुद्राक्षा अत्र कमलबीजानि। मधुव्रता भृङ्गाः। कोकनदे
च [45.a] इत्थं युक्तमेवेति च्छलम्। तत्त्वतस्तु धृता रुद्राक्षा एव
मधुव्रता भ्रमरा येन स तथेत्युपमानेन कोकनदभ्रमः। अथवा मधुव्रत-
-मत्र मधुनो व्रतम्। हेयोपादान[3]लक्षणमिति व्याख्येयम् ॥६॥

पतगश्चिरकालपालनाद[4]तिविश्रम्भमवापि[5] तेन सः।
अतुलं विदधे कुतूहलं भुजमेतस्य भजन्महीभुजः ॥७॥

स पतगस्तेन नलेन अतिविश्रम्भमधिकविश्वासमवापि[6] प्रापितः। कस्मात्?
चिरेत्यादि। अधिकसमयप्रतीक्षणात्। यतोऽर्थात् स हंसोऽस्य महीभुजो
नलस्य भुजं बाहुं भजन् स्वात्मनैव आयन् सन्, अतुलमधिकं
कुतूहलं कौतुकं विदधे चकार। महीभुजः कुतूहलेन मुख्यः संबन्धः।

---

1. B2. om. -त्र.
2. B2. लक्ष्मापि.
3. B2. -पादेय.
4. B1, P. लालनात्.
5. B1, P. अवापितो नु.
6. B1. अवापितः

भुग्नेन नु गौणः। "चिरकाललालजात" इति वा पाठः। तत्र च न तथा विवक्षितोऽर्थः संगच्छति। किञ्च पुस्तकान्तरे "अतिविस्रम्भमथापितो नु सः" तदा नुशब्दः पूर्वार्धापेक्षया पश्चादर्थे ॥७॥

नृपमानसमिष्टमानसः स निमज्जत्कुतुकामृतोर्मिषु ।
अवलम्बितकर्णशष्कुलीकलसीकं रचयन्नवोचत ॥८॥

स इष्टमानसो हंसोऽ[1]वोचत, अवादीत्। किं कुर्वन्? नृपमानसं नलचित्तं अवलम्बितकर्णशष्कुलीक[2]लसीकं रचयन् विदधत्। नृपस्य मानसं स्वान्तं तत् तथा। कर्णशष्कुली कर्णविवरम्। सैव कलसी कुम्भी। अवलम्बिताऽवष्टब्धा कर्णशष्कुलीकलसी येन तत् तथा। "[3]नद्यृतश्च बहुव्रीहौ कः"। (पा. V. 4. 153)। किमिति कर्णशष्कुलीकलसीमवलम्बित इत्याह। यतः किं कुर्वन्? निमज्जन् ब्रुडन्। कासु? कुतुकामृतोर्मिषु कुतूहलसुधालहरीषु। अन्योऽप्यमृतस्योदकस्य लहरीषु निमज्जन् कलसीमवलम्बते। कर्णशष्कुली चात्रैकैव ग्राह्या। तथा बहिःश्रवणाव[4]धानातिशयो भवति ॥८॥ किमवोचदित्याह —

मृगया न विगीयते नृपैरपि धर्मागममर्मपारगैः।
स्मरसुन्दर! मां यदत्यजस्तव धर्मः स दयोदयोज्ज्वलः ॥९॥

हे स्मरसुन्दर! हे कामरमणीय नल! मृगया पापर्द्धिर्न विगीयते, न [5]जुगुप्स्यते। कैः? नृपै राजभिः। राजानो मृगयां शीलयन्तीत्यर्थः। कीदृशैः? [6]धर्मेत्यादि। धर्मागमाः स्मृतयस्तेषां मर्म रहस्यं, तस्य पारं सीमान्तं गच्छन्ति ये ते तथा तैः। एवमपि सति यत् त्वं मां अत्यजस्त्यक्तवानसि, स तव धर्मो [7]दयोदयोज्ज्वलः। दयाया उदयास्तैरुज्ज्वलोऽतिनिर्मलः स तथा।

1. B2, 8. अवोचत्. 2. B1. कलशीकं. 3. B2. नेद्यृ– 4. B2. –दधाना– 5. B2. जुप्स्यते. 6. B2. धर्म– 7. B2. om. दयो–

दयावशादहं भवता मुक्तो, न त्वधर्मभयात्, नृपाणां मृगयाया विहितत्वात्। केचित् तु 'हे सुन्दर स्मर! अध्येमि!' इति व्याकुर्वते ॥९॥

शास्त्रविहिता-[45-b]-यामपि नृपाणां मृगयायां हेत्वन्तरमुद्भावयति —

अबलस्वकुलाशिनो झषान्निजनीडद्रुमपीडिनः खगान्।

अनवद्यतृणार्दिनो मृगान् मृगयाऽघाय न भूभृतां घ्नताम् ॥१०॥

भूभृतां राज्ञां मृगया आखेटोऽघाय पापाय न भवति। किं कुर्वताम्? घ्नतां हिंसताम्। कान्? झषान् मत्स्यान्। कीदृशान्? अबलेत्यादि। अबलमशक्तं स्वकुलं निजान्वयमश्नन्तीत्येवंशीलास्ते तथा तान्। अयं अयं च महानपराधः। न परं झषान् घ्नताम्।[1] किं तु खगान् पक्षिणोऽपि। कीदृशान्? निजेत्यादि। निजा नीडा कुलायो यत्रेदृशो यो द्रुमस्तं पीडय- -न्तीत्येवंशीलास्ते तथा तान्। आश्रयदायिनोऽर्दनमपि महदघः। पुनः कान्? मृगान् हरिणान्। कीदृशान्? अनवद्येत्यादि। अनवद्यानि प्रधानानि तृणान्यर्द- -यन्त्युपद्रवन्तीत्येवंशीलास्ते, तथा तान्। अयमपि निग्रहहेतुः। अत्र च दीपकोऽलङ्कारः ॥१०॥

यदवादिषमप्रियं तव प्रियमाधाय नुनुत्सुरस्मि तत्।

कृतमातपसंज्वरं तरोरभिवृष्यामृतमंशुमानिव ॥११॥

हे राजन्! अहं यत् तव अप्रियं कटु अवादिषमुक्तवानस्मि, तदहं नुनुत्सुरस्मि, अपनेतुकामो वर्ते[2]। किं कृत्वा? प्रियं[3] रुचितमाधाय विन्यस्य कृत्वेत्यर्थः।

---

1. B1. खगानपि। कीदृशान्? निजनीडद्रुमपीडिनः। आत्मीयकुलाय वृक्षबाधकान्। अयमप्यपराधः। मृगानपि निघ्नताम्। कीदृशान्? अनवद्येत्यादि।

2. B1, B. वर्ते. 3. B2. रुचितप्रियं.

क इवांशुमालिव । रविर्यथा नुनुत्सति । कम् ? आतपसञ्ज्वरं उष्माणम् । कीदृशम् ? कृतं जनितम् । कस्य ? तरोः शाखिनः । किं कृत्वा ? अभिवृष्य, विकीर्य । किम् ? तदमृतं, अमृतसदृशमुदकम् । नुनुत्सुरिति नुद प्रेरणे ॥२१॥

उपनम्रमयाचितं हितं परिहर्तुं न तवापि साम्प्रतम् ।
करकल्पजनान्तराद्विधेः शुचितः प्रापि स हि प्रतिग्रहः ॥२२॥

हे राजन् ! अयाचितमुपनम्रमप्रार्थितमघटितं हितमनुकूलं तवापि[1] भवतोऽपि परिहर्तुं त्यक्तुं न साम्प्रतं, न युक्तम् । हि यस्मात् स तादृशः प्रतिग्रहः शुचितः[2] प्रसन्नात् विधेः प्रापि, दैवात् लब्धः । कीदृशात् ? करेत्यादि । करकल्पो हस्तरूपो[3] जनो मल्लक्षणादिरन्तरे मध्ये यस्य स तथा तस्मात् । अस्मदादिः केवलं मध्यवर्ती दाता तु प्रसन्नो विधिरेव ॥२२॥

पतगेन मया जगत्पतेरुपकृत्यै तव किं प्रभूयते ।
इति वेद्मि न तु त्यजन्ति मां तदपि प्रत्युपकर्तुमर्तयः ॥२३॥

मया पतगेन पक्षिणा तव जगत्पतेर्नलस्योपकृत्यै उपकाराय किं प्रभूयते शक्यते ? अपि तु नेति काक्वा निषेधः । 'इति वेद्मि एवं जानामि' इति पूर्वार्धवाक्यार्थस्यैव कर्मता । तु पुनरर्तयः पीडास्तदपि तथापि मां न त्यजन्ति । किं कर्तुम् ? प्रत्युपकर्तुं प्रतिहिताचरणायार्थात् तव । पतगेनेति जगत्पतेरिति च साभिप्रायम् । मम हि पतत्रमात्रैव सामग्री, त्वं च जगत्पतिरखिलसामग्रीकः । 'अर्तिः पीडाधनुःकोट्योः' इत्यनेकार्थः ॥२३॥

अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रियाम् ।
पृथुरित्थमथाणुरस्तु सा न विशेषे विदुषामिह ग्रहः ॥२४॥

---

1. B1. तथा वापि. 2. B2. सूचितः. 3. B2. —नौ.

अथवेत्यवकाशल-[46-a]-ध्धौ। उपकर्तुः पुरुषस्याचिरात् शीघ्रमेव उपक्रिया-
-माचरेत्, उपकारं कुर्वीत। अर्थात् पुरुषः। कीदृशीम्? आत्मौपयिकीम्। आत्मैव उपायो यत्र सा तथा, ताम्। उपाय एव औपयिकम्। आत्मोपायामित्यर्थः। उपकर्तुः पुरुषस्य त्वरितमात्मानं निवेदयेदिति यावत्। इत्थमेवं सति सा उपक्रिया पृथुरस्तु, महती भवतु। अथ अथवा अणुरस्तु लघीयसी भवतु। इहार्थे विदुषां शास्त्रविदां ग्रहो नास्ति, नियमो न विद्यते। क्व? विशेषे विभेदे ॥१४॥

भविता न विचारचारु चेत्तदपि श्रव्यमिदं मदीरितम्।
खगवागियमित्यतोऽपि किं न मुदं धास्यति कीरगीरिव ॥१५॥

हे राजन्! चेत् यदि इदमेतत् मदीरितं मम भाषितं विचारचारु विवेचनसहं न भविता, न भविष्यति, तदपि तथापि श्रव्यं श्रवणार्हमर्थात् तव। इत्यतोऽपि एवमस्माद् हेतोरपि मदीरितं कर्तृ किं मुदं न धास्यति? अपि तु, प्रीतिं करिष्यत्येव। इति किं तदाह। इयं खगवाक् विस्पष्टं पक्षि-
-वचनमिति काकुः। केव। कीरगीरिव शुकवागिव। इयमित्येतस्यैव वा धास्यतीत्यस्य कर्तृत्वम् ॥१५॥

इदानीं प्रस्तुतमाह—

स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः।
यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम् ॥१६॥

किलेत्यागमे। स भीमभूपतिर्भीमनामा राजा जयति। कीदृशः? अरीत्यादि। अरीणां सार्थस्तत्रासार्थकं सत् सार्थकं कृतं, सार्थकीकृतं नाम, येन, स तथा। स खलु भीमो, बिभेत्यस्मादिति कृत्वा अरिसार्थो, यदा तस्माद् बिभेति, तदा तदा तस्य नाम सार्थकं भवति। स क इत्याह—

यं प्रभुं स्वामिनमवाप्य लब्ध्वा विदर्भभूर्विदर्भदेशभूमिः शक्रभर्तृकाममिन्द्र-स्वामिकामपि द्यामपि हसति, स्वर्गमपि[1] तिरस्करोति। हासेन तिरस्कारो लक्ष्यते। भीमस्य 'शक्र' उपमानं, विदर्भदेशभूमेश्च 'द्यौः'। आक्षेपोऽलङ्कारः। एतेन 'विदर्भदेशे भीमो नाम राजाऽस्ति' इति प्रतिपादितम्॥१६॥

दमनाद्दमनात्प्रसेदुषस्तनयां तथ्यगिरस्तपोधनात्।

वरमाप स दिष्टविष्टपत्रितयानन्यसदृग्गुणोदयाम्॥१७॥

स भीमस्तनयां वरमाप पुत्रीं प्रसादं लेभे[2]। कस्मात्[3]? दमनाद् दमननाम्नो[4] मुनेः। कीदृशात्? प्रसेदुषः। प्रभूतं यथा भवत्येवं प्रसन्नात्। पुनः कीदृशात्? तथ्यगिरः, सत्यवचनात्। पुनरपि कीदृशात् तपोधनात्। विशेषण-त्रयं साभिप्रायं हेतुगर्भम्। कीदृशीं तनयामित्याह। दिष्टेत्यादि। दिष्टे दत्ते विष्टपत्रितये भुवनत्रये अनन्यसदृक् सर्वोत्कृष्टो गुणानां लावण्यादीनामुदय [5]आविर्भावो यस्याः सा तथा ताम्। देवाद् दत्ते वरः श्रेष्ठे इत्यनेकार्थः॥१७॥

भुवनत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम्।

उदियाय यत-[46 b]-स्तनुश्रिया दमयन्तीति ततोऽभिधां दधे॥१८॥

असौ भीमतनया ततो हेतोर्दमयन्तीत्यभिधां नाम दधे, बभार। ततः कुत इत्याह। यतः कारणाद् दमयन्ती [6]यन्त्रयन्ती सती उदियाय, उदिता। कम्? कमनीयतामदं[7] रामणीयकगर्वम्। कासाम्? भुवनत्रयसुभ्रुवाम्। भूर्भुवःस्वर्वाम-लोचनानाम्। कया कृत्वा? तनुश्रिया वपुःकान्त्या। एतेन दमयतीति दमयन्ती[8] नाम्नः सार्थकत्वमुक्तम्॥१८॥

---

1. B2. स्वर्थमपि.
2. B2. लोभे.
3. B2. कस्मा.
4. B2, B. दमनाम्नो.
5. B2. अविर्भावो.
6. B2. om. यन्त्रयन्ती.
7. B2. -वामदः.
8. B2. इति नाम्नः.

श्रियमेव परं धराधिपाद् गुणसिन्धोरुदितामवेहि ताम्।

व्यवधावपि वा विधोः कलां मृडचूडानिलयां न वेद कः॥१९॥

हे राजन्! तां[1] दमयन्तीं त्वं श्रियमेव अवेहि, लक्ष्मीमेव जानीहि। परं केवलं गुणसिन्धोर्धराधिपाद् उदिताम्। सा च प्रसिद्धा क्षीरसिन्धोरुदिता। परमिति विशेषे। वा अथवा विधोः कलां को न वेद? अपि तु सर्वे जानन्ति। कां कलाम्? मृडेत्यादि। मृडः शम्भुस्तस्य चूडा[2] शिखा, सा एव निलयः स्थानं यस्याः सा, तथा ताम्। क्व वर्तमानाम्? व्यवधावपि दूरेऽपि। एतेन सा त्वया ज्ञाता भविष्यति, मम तत् कथनं वृथेत्युक्तं भवति॥१९॥

इदानीं तामेव वर्णयति।

चिकुरप्रकरा जयन्ति ते विदुषी मूर्धनि सा बिभर्ति यान्।

पशुनाप्यपुरस्कृतेन तत् तुलनामिच्छतु चामरेण कः॥२०॥

चिकुरप्रकराः कुन्तकलापा[3] जयन्ति सर्वोत्कर्षेण वर्तन्ते। बहुत्वं प्रशंसायाम्। ते के? यान् सा विदुषी सर्वशास्त्रचतुरा मूर्धनि[4] उत्तमाङ्गे बिभर्ति धारयति। विदुषी मूर्धनि चेति द्वयं साभिप्रायम्। तत् तुलनां तेषां[5] चिकुरप्रकराणां सादृश्यं चामरेण प्रकीर्णकेन सह को विशेषविदिच्छतु? अपि तु न कोऽपि, काक्वा निषेधो लभ्यते। कीदृशेन चामरेणेत्याह। पशुनाप्यपुरस्कृतेन[6]। पशुनेति मूर्खोपलक्षणम्। अपुरस्कारश्च असत्कारः। तच्चतस्तु[7] पशुना-ऽरण्यगव्याऽपुरस्कृतेनानङ्गभागविहितेन। गौश्च मुख्यः पशुः। मानुषी-प्रकृतिर्मूर्धानमारभ्य वर्ण्यते॥२०॥

---

1. B2. त्वां.
2. B2. चूला.
3. B2. कुन्तल-
4. B2. मूर्ध्नि.
5. B2. तेषु.
6. B2. पशुनापि पुरस्कृतेन.
7. B1. तत्कृतस्तु

स्वदृशोर्जनयन्ति सान्त्वनां खुरकण्डूयनकैतवान्मृगाः ।

जितयोरुदयत् प्रमीलयोस्तदखर्वेक्षणशोभया भयात् ॥२१॥

मृगा हरिणाः स्वदृशोर्निजचक्षुषोः सान्त्वनां सम्बोधनं जनयन्ति । कस्मात्? खुरेत्यादि । शफावघर्षणव्याजात् । यतः कीदृश्योः? जितयोः पराभूतयोः । कया? तदखर्वेक्षणेत्यादि । तस्या दमयन्त्या अखर्वे द्राघीयसी[1] ये ईक्षणे, तयोः शोभा कान्तिस्तया तथा । अत एव कीदृश्योः? उदयदित्यादि । उदयन्ती उत्पद्यमाना प्रमीला सङ्कोचो ययोस्ते तथा तयोः । कस्मात्? भयात् । अत्रानुमानम् ॥२१॥

अपि लोकयुगं दृशावपि श्रुतदृष्टा रमणीगुणा अपि ।

श्रुतिगामितया दमस्वसुर्व्यतिभाते [47.a] सुतरां धरापते ॥२२॥

हे धरापते! लोकयुगं सुतरामतिशयेन व्यतिभाते । दृशावपि व्यतिभाते । [2]रमणीगुणा अपि व्यतिभाते इति वचनश्लेषः । लोकयोः स्वर्गपातालयोर्युगं लोकयुगम् । रमणीगुणाः कीदृशा इत्याह – श्रुतदृष्टाः । पूर्वं श्रुताः पश्चाद् दृष्टाः श्रुतदृष्टाः । कया कृत्वा? श्रुतिगामितया । कस्याः? दमस्वसुः । वस्तु[3]त्रितयेऽपि दमयन्ती श्रुतिगामिताकारणम् । तथा हि, – श्रुतेः श्रवणस्य गामिता सञ्चारः [4]श्रुतिगामिता, तया तथा । स्वर्गे यथा दमयन्ती श्रूयते, तथैव पाताले । यथा पाताले, तथैव स्वर्गे, एवं च व्यतिभानं विनिमयेन लोकद्वयस्य शोभनं भवति । दृशौ श्रुतिगामितया श्रुत्योः श्रवणयोर्गामिता [5]प्राप्तिस्तया तथा । दमयन्त्या यथा वामा दृक् श्रुतिगामिनी तथा दक्षिणा, यथा दक्षिणा तथा वामेत्येवं विनिमयः । रमणीगुणा अपि श्रुतिगामितया । श्रुतिः शास्त्रं, तत्र गामिता

1. B2. प्रधीयसी.
2. B2. om. रमणीगुणा अपि.
3. B2. वसु, ৪. वस्त्र.
4. B2. श्रुतिः श्रवणं गामिता.
5. B2. om. hapl. प्राप्तिस्तया ---- ------- तत्र गामिता.

प्रवेशस्तथा तथा। यथा शास्त्रे रमणीगुणाः प्रतिपादितास्तथा दमयन्त्यां, यथा दमयन्त्यां तथा शास्त्रे, एवं च विनिमयः। दमस्वसुरिति संबन्धः। लोकयुगस्य स्वर्गपाताललक्षणस्य दमयन्त्या संबन्धस्तदेकतरतो[1]ऽवतारसम्भावनात्। व्यतिभाते इति वर्तमाना ते, आते, अन्ते ॥२२॥

नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे।
अपि खञ्जनमञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम् ॥२३॥

तदीक्षणे दमयन्त्या नयने खञ्जनमपि चारुतरं खञ्जरीटमपि रुचिगर्व-दुर्विधं कान्त्यहंकार[2]दरिद्रं विदधाते कुरुतः। कीदृशी तदीक्षणे? अञ्जनाञ्चिते कज्जलालङ्कृते। किं कुर्वती? नलिनं कमलं मलिनमनुज्ज्वलं विवृण्वती प्रकटयन्ती। पुनः किं कुर्वती? अस्पृशती अच्छुपन्ती। काम्? पृषतीं हरिणीम्। अत्र श्लेषः ॥२३॥

अधरं किल बिम्बनामकं फलमाभ्यामिति भव्यमन्वयम्।
लभतेऽधरबिम्ब इत्यदःपदमस्या रदनच्छदे वदत् ॥२४॥

किलेति वक्तुः स्वपक्षोपक्षेपे। ममैतन्मतम्। अस्या भैम्या रदनच्छदे वदत् ओष्ठयोर्वाचकम्। अधरबिम्ब[3] इत्यदःपदमेवंप्रकार एव वर्णसमुदाय[4] इतीत्थं भव्यमन्वयं लभते। शोभनं योगं प्राप्नोति। एवमस्य निरुक्तं युक्तमिति यावत्। इति कथं तदाह। बिम्बनामकं बिम्बसंज्ञं फलमाकार-गुणेनाभ्यामोष्ठाभ्यां सकाशादधरं हीनमिति हेतोरिमावधरबिम्बशब्दवाच्यौ। इह किलोपमा कवीनाम[5]मरादि सुन्दरीसौन्दर्यं वर्णयितुमुद्यतानामोष्ठवर्णना-वसरे। अस्या अधरो बिम्बमिवेत्यधरबिम्बमि[6]त्यन्वय-[47.b]-व्यवहारः।

1. B1. - तयोरतो·
2. B2. कान्त्यहंकर·
3. B1. - बिम्बमित्यदः
4. B2. - समुदाय-
5. B2. - ममदिरा
6. B2. - मित्यस्य -

प्रशंसावचनैश्च रूढैरिति चात्र समासः। एतेन भैम्या अधरौ बिम्बादपि मनोहराविति प्रतिपादितम्। हीनत्वहेतुस्त्वत्र नोपन्यस्तः। विशेषस्य वक्तुः[1] प्रत्यक्षत्वात्। वाक्यस्य पौर्वापर्यपर्यालोचनयाऽत्राक्षेपोऽलङ्कारः। 'रदनच्छदे' इति नपुंसकत्वं चिन्त्यम्। छदशब्दस्य पुंस्त्वाम्नातत्वात्। तथा चामरदत्तः। "दलं पत्रं[2] च्छदः पुमान्" इति (अमरकोष)। "ओष्ठाधरौ[3] तु रदनच्छदौ दशनवाससी" इति च। अथवा रूढिमनपेक्ष्य छादनात् च्छदमिति योगमात्रं चापेक्ष्य वासःशब्दवच्छदशब्दस्यापि नपुंसकत्वं प्रयुक्तं सर्वज्ञेन[4] श्रीमता हर्षमिश्रेण। कवेरस्याशयस्तु मया सम्यग् नाव-बुध्यते। सहृदयैस्तु यथैवास्य श्लोकस्यार्थः सङ्गच्छते, तथैव व्याख्येयः। व्याख्या हि बुद्धिबलमपेक्षते प्रायः। 'अधरबिम्बः' इत्यत्र वर्णसमुदायापेक्षया पुंस्त्वम् ॥२४॥

हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।
कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिमम् ॥२५॥

चन्द्रबिम्बं भैमीमुखनिर्माणार्थं ब्रह्मणा गृहीतस्थिरांशमिव। इवशब्दोऽत्र सम्भावनायां निश्चये वा। कथं ज्ञायत इत्याह। यतो विहितान्तश्छिद्रं विलोक्यते लक्ष्यते। कथं ज्ञायतेऽत्र? शशिबिम्बे छिद्रमस्तीति हेतुगर्भं विशेषणमाह। धृतेत्यादि। धृतो अवस्थितो गम्भीरायां निम्नायां खन्यां दृ-वर्तविशेषस्य नभसो नीलिमा नीलत्वं यत्र तत् तथा। धृत उपात्तो वा येनेति व्याख्येयम्। न हि निश्छिद्रे चन्द्रमण्डलेऽपरभागावस्थितो नभसो नीलिमा दृश्यते-ऽन्यथाऽधःस्थैः। यस्माच्च तत्र तैः स दृश्यते, तस्मादवश्यं छिद्रमस्ति। छिद्रे च निमित्तान्तरासम्भवादिदमेव निमित्तमनुमीयते ॥२५॥

---

1. B2. चक्षुः 2. B1. पर्णं. 3. B2. तथाधरौ. 4. B2. सर्वज्ञेन श्रीमहता.

धृतलाञ्छनगोमयाञ्चनं विधुमालेपनपाण्डुरं विधिः।
भ्रमयत्युचितं विदर्भजाननीराजनवर्धमानकम् ॥२६॥

विधिर्ब्रह्मा विधुं चन्द्रमुचितं सदृशं विदर्भजाननीराजनवर्धमानकं भ्रमयति, चक्राकारगतिव्यापारविषयीकरोति। भैम्या मुखस्यारात्रिककरणाय समुचितः शरावश्चन्द्रोऽन्यासां तु वधूनां मृदादिमयः। विशेषणमुखेनारात्रिक-शरावकस्य धर्मानाह। अवस्थितलक्ष्मगोविट्पूजनमुपदेहधवलमिति च नार्थं चन्द्रः प्रकृत्या शुभ्रः, किं तु सुधावल्काद्युपदेहवशेन। अन्योऽप्यारा-त्रिकशरावक ईदृश एव भवति। चन्द्रस्य च प्रादक्षिण्येन मेरुं परितो भ्रमणं सर्वजनविदितम्। आरात्रिकशरावपक्षे भ्रमणमुच्चारणं लोकोक्त्या ॥२६॥

[५९.a] सुषमाविषये परीक्षणे निखिलं पद्ममभाजि तन्मुखात्।
अधुनाऽपि न भङ्गलक्षणं सलिलोन्मज्जनमुज्झति स्फुटम् ॥२७॥

निखिलं सर्वजातीयं पद्ममब्जमभाजि भग्नम्। लक्षणया पराजितमित्यर्थः। रणे हि भङ्गः पराजयः। पराजयस्तु हानिः। हानिरपि विश्लेषः। पराजितो विश्लिष्य पलायते। कुतो भग्नमित्याह। भैमीवदनस्य सकाशात्। क्व सति। परीक्षणे निश्चयने सति। कीदृशि? सुषमाविषये[1]। सुषमा परमा शोभा, सा एव विषय आश्रयो यस्य तत् तथा तस्मिन्। केनापि कौतुकिना कविना विधिना वा परीक्षाकर्तुमुत्क्रान्ता। भैमीमुखं कान्तिमदाहोस्विदब्जम्। ततश्च [2]प्रमाणकोटिमधिरूढायां परीक्षायां सफलं जलजं भैमीमुखात् खलु हीयते स्म। निखिलम् इत्यनेनैतदाननस्यैकस्य प्रतिपक्षबाहुल्यं सूच्यते। कथं ज्ञायते भङ्ग इत्याह। साम्प्रतमपि हानिचिह्नं जलोत्प्लवनं न त्यजतीति दिव्यविधौ ह्येवं स्थितम्।

1. Br. मुखमा –  2. Br. प्रमाणविषकोटि –

वादिप्रतिवादिनोर्जयपराजयपरीक्षार्थं धर्माधिकरणनियुक्तैरेकस्तयोस्तदिच्छया न्यायागतविशेषाद् वा जले निमज्ज्यते। केनापि च धनुष्मता शरः क्षिप्यते। वेगवानसौ न्यस्तस्यानयनाय नियुज्यते[1]। यावत् स शरमानीय सभ्यसमीपवर्तिनः क्षेप्तुर्हस्ते प्रयच्छति, तावद्यदि स जले निमग्नस्तिष्ठति, तदाऽवश्यं तस्य [2]जयोऽन्यथा पराजयः ॥२७॥

धनुषी रतिपञ्चबाणयोरुदिते विश्वजयाय तद्भ्रुवौ ।
नलिके न त्वदुच्चनासिके त्वयि नालीकविमुक्तिकामयोः ॥२८॥

तस्या भ्रुवौ रतिपञ्चबाणयोर्द्वयोर्द्वे धनुषी उदिते। किमर्थम्? विश्वजयाय। विश्ववशीकरणं तु प्रत्यक्षमेव, स्वयंवरे जगज्जनतायाः समागतत्वात्। विश्ववशी-करणार्थं तदुद्गमः। किं तु त्वयि विषये नालिकविमुक्तिकामयोः नलिका-काण्डक्षेपाभिलाषयोः। नालिकं ह्यनवबुद्ध[3]गमनपातं दूरस्थमपि वेध्यं विध्यति। तद्विद्धस्तद्वेधशङ्की वा प्रतिपक्षोऽवश्यं वेद्धुर्वश्यो भवति। ननु नालिकानि नलिकया क्षिप्यन्ते। के तयोर्नलिके इति तत् सद्भावमाह। तस्या उच्चा नासिका छिद्रद्वयोपलक्षिता किं नलिके न भवतः। अपि तु नलिके एवेति निषेधेऽपि काकुवशाद् विधिः। 'उदिते' इत्यनेन प्रभावातिशयः प्रतिपाद्यते। अथ चार्थान्तरम्। त्वयि विषये अलीकविमुक्तिकामयोर्न, अपि तु सत्य-शर[4]क्षिपयोः दमयन्तीलब्धेः ॥२८॥

सदृशी तव शूर सा परं जलदुर्गस्थमृणालजिद्भुजा ।
अपि मित्रजुषां सरोरुहां गृहयालुः करलीलया श्रियः ॥२९॥ [48.b]

1. B1. वियुज्यते.
2. B2. जयो.
3. B1. –गमपातं.
4. B2. – क्षेपयोः

हे शूर ! सा भैमी केवलं तव [सदृशी] योग्या, नान्यस्य । यतः कीदृशी ? जलेत्यादि । जलमेव दुर्गं दुर्ग्राह्यं निवेशस्थानं, तत्र तिष्ठत एवंभूते ये मृणाले बिसे, ते जयतः परिभवत एवंभूते भुजे बाहुलते यस्याः सा तथा । एतेन तस्या अपि शूरत्वं दर्शितम् । यो ह्येवंविधं प्रतिस्पर्धिनं जयति, सोऽवश्यं शूरः । शूरयोश्च समागमो युक्तः । किञ्च करलीलया बलिहेलया मित्रजुषामपि सुहृत्समाश्रितानामपि सरोरुहां जलजानां श्रियः सम्पदो गृहयालुः ग्रहण-शीला यो हि सुहृत्समाश्रितानामपि प्रतिस्पर्धिनां सम्पदो बलिहेलया गृह्णाति, सोऽवश्यं शूरः । तत्त्वतस्तु मित्रः सूर्यः । करः पाणिः । श्रियः कान्तयः । भुजयोः सरस बिसजयेन[1] सौकुमार्यम् । दिवसविकस्वरसरसिज-कान्तिग्रहणेन च पाणिद्वयस्य लौहित्यचारुत्वादि प्रतिपाद्यते ॥२९॥

वयसी शिशुतातदुत्तरे सुदृशि स्वाभिविधिं विधित्सुनी ।
विधिनापि न रोमरेखया कृतसीम्नि प्रविभज्य रज्यतः ॥३०॥

भैम्यां विषये बाल्ययौवने अवस्थाविशेषौ निजव्याप्तिं कर्तुकामे ब्रह्मणा रोमराज्याकरणभूतया प्रकृष्टं विभागं कृत्वा, विहितमर्यादायामपि न रज्यतः न संतुष्यत इति । सन्धिः सूचितः । रोमराजी च[2] वर्णिता । रोमराजी सीमेवेति प्रतीयमानोत्प्रेक्षा । अपितश्लेषार्थस्तु[3] प्रसिद्धः ॥३०॥

अपि तद्वपुषि प्रसर्पतोर्गमिते कान्तिझरैरगाधताम् ।
स्मरयौवनयोः खलु द्वयोः प्लवकुम्भौ भवतः कुचावुभौ ॥३१॥

द्वौ स्तनौ, द्वौ तरणकलशौ स्तः । कयोः ? पञ्चशरतारुण्ययोः । द्विवचनेनैव द्वित्वे लब्धे द्विशब्दोपादानमुक्तिप्रत्युक्तिविशेषप्रतिपादनार्थम् । किं कुर्वतोः ?

---

1. B1. विजयेन. 2. B1. om. च. 3. B2. om. -स्तु.

प्रसर्पतोः प्लवमानयोः। क्व? भैमीगात्रे। कीदृशि? धुतितनुप्रवाहैरतलस्पर्शत्वं प्रापिते। अन्यस्मिन्नपि जलाशये पर्वतादिप्लुतैस्तनुजलप्रवाहैरगाधत्वं नीते प्लवमानयोः कयोश्चिद् द्वयोर्द्वौ प्लवकलशौ युज्येते, न ह्येकेन कलशेन ह्यवगाधे जले सुखेन प्लवेत। इति स्तनवर्णने, प्रतीयमानोत्प्रेक्षा ॥३१॥

कलशे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः।

स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रममातनोति यत् ॥३२॥

कलशे वर्तमानश्चक्रभ्रमकारितागुणः किमु निजहेतुदण्डजः। चक्रं कुलालोप-करणं, तस्य भ्रमो भ्रमणं कुण्डलाकारं चलनं, तं करोतीत्येवंशीलश्चक्रभ्रमकारी, तस्य भावश्चक्रभ्रमकारिता, सैव गुणो धर्मः। निजस्य स्वस्य निजो वा हेतुः सहकारिकारणं यो [५१.a] दण्डो वंशादिजस्तस्माज्जातः संक्रान्तः। किं घट-निर्माणावसरे हि कुलालेन प्रयुज्यमानो दण्डश्चक्रं भ्रमयति। ननु क्व? कलशे स गुण उपलब्ध इत्याह। यत् कारणात् स कलशस्तस्या उच्चौ कुचौ भवन्। सम्पद्यमानस्तद्रूपतया परिणमन् प्रभाझरचक्रभ्रममातनोति करोति। प्रभा कान्ति-स्तस्याः सुधारूपत्वात् झरस्तनुःप्रवाहः प्रस्रवणं तत्र तस्य वा यच्चक्रं कुलालोपकरणं तस्य भ्रमणं[1] प्रेरणमिति चक्रभ्रमशब्दयोरुभयार्थत्वात् छलोक्त्या शब्दमात्रेणैव कुलालोपकरणप्रेरणे। तत्त्वतस्तु प्रभाझरे यौ चक्रौ चक्रवाकौ, तयोर्भ्रमो भ्रान्तिर्मिथ्याज्ञानम्। झरे चावश्यं चक्रवाकसम्भ्रमः[2]। एतेन भैमीस्तनयोः कोकसादृश्यमुक्तम्। कलश इति जातावेकवचनम्। दण्डो हि घटस्य सहकारी-हेतुः। सहकारिणश्च गुणः कार्ये न संक्रमति। सोऽपि किं तत्र संक्रान्तः प्रतिपादितया[3] युक्त्या तस्य तत्र प्रत्यक्षतयोपलब्धेः। कार्यधर्मे प्रस्तुते[4] त्वप्रस्तुतस्य समवाय्यादिकारणकलापस्योपन्यासः खलु नौचित्यमावहति।

1. B1. भ्रमः 2. B1. -सम्भवः. 3. B1. प्रतिपादित युक्तात. 4. B2. om. प्रस्तुते.

अतस्तल्लक्षणादि तत्प्रधानेभ्यः शास्त्रेभ्यः सम्यगुपादेयम् । अत्र श्लेषः ॥३२॥

भजते खलु षण्मुखं शिखी चिकुरैर्निर्मितबर्हगर्हणः ।

अपि जम्भरिपुं दमस्वसुर्जितकुम्भः कुचशोभयेभराट् ॥३३॥

मयूरैरावणौ प्राधान्येन स्कन्दशक्रयोर्वाहनतया[1] प्रसिद्धौ । तत्र कविर्हेत्वन्तरमाह । शिखी नूनं भैम्याः केशैः कृतकलापकुत्सनः सन् स्कन्दं सेवते । किन्नायं प्रसन्नो मत्साहाय्यं करिष्यतीति । किञ्च गजराजोऽपि कुचशोभया पराभूत-मूर्ध्वपिण्डः सन् शक्रमुपास्ते । देवा हि सम्यगाराधिता, इष्टफलप्रदास्तयोश्च प्रतिपक्ष जय प्रवेष्टः । स्तनकेशवर्णनम् ॥३३॥

उदरं नतमध्यपृष्ठतास्फुरदङ्गुष्ठपदेन मुष्टिना ।

चतुरङ्गुलिमध्यनिर्गतत्रिवलिभ्राजि कृतं दमस्वसुः ॥३४॥

भैम्या मध्यं मुष्टिना कृतं निर्मितमर्थतो विधिना । केनचिद् दृढं गृहीतं वा । कीदृशेन ? नतं मध्यं यस्य तन्नतमध्यम् । एवंभूतं यत्पृष्ठं तलोऽवरमो भागस्तद् विद्यते यस्य तन्नतमध्यपृष्ठं, तस्य भावो नतमध्यपृष्ठता । सैव स्फुरदुल्लसदङ्गुष्ठस्य पदं स्थानं यस्य तेन । इदं नतं पृष्ठं न भवति । किन्त्वङ्गुष्ठ-निवेशोऽयम्[2] । स हि तथैवोपलभ्यते । अन्यच्च कीदृक् ? चतस्रश्च ता अङ्गुलयश्च, तासां मध्यानि त्रीणि तत्र निर्गता यास्तिस्रो वलयो[3] मांससङ्कोचविशेषास्ताभिर्भ्राजत इत्येवंशीलम् । अयमपि मुष्टिकरणज्ञाने हेतुः । एतेन मुष्टिग्राह्योदरीयमित्युक्तम्[4] ॥३४॥

उदरं परिमाति मुष्टिना कुतु-[41.b]-की कोऽपि दमस्वसुः किमु ।

धृततच्चतुरङ्गुलीव यद्वलिभिर्भाति सहेमकाञ्चिभिः ॥३५॥

---

1. B2. वाहनं.
2. B2. -निवेशायम् ;
3. B2. चलयो.
4. B2. -ग्रासो-

कोऽपि [31] विज्ञातः सिद्धादिभिर्मया मध्यं मुष्टिना परिमाति। इयदेतदिति परिच्छिनत्ति। यद्धेतोस्तनमध्यं कनकरशनासहिताभिस्तिसृभिर्वलिभिर्धृत-तच्चतुरङ्गुलिवल्लक्ष्यते। धृता अवस्थितास्तस्या लक्ष्यस्य परिमातुरेव दृश्याश्चतस्रोऽङ्गुलयो यत्र। धृता गृहीता येनेति वा। एतेनातिगौरत्वं वलीनामुक्तम्। स्वर्णकाञ्चीसमत्वात्[1]। कोऽपि ब्रह्मापीति वा ॥३५॥

पृथुवर्तुलतन्नितम्बकृन्मिहिरस्यन्दनशिल्पशिक्षया।

विधिरेकचक्रचारिणं किमु निर्मित्सति मान्मथं रथम् ॥३६॥

ब्रह्मा किमु मन्मथसंबन्धिनं रथं निर्मातुमिच्छति। कीदृशम्? एकमेव एककं तच्चक्रं च[2] तेन चरतीत्येवंशीलस्तम्। कथा? मिहिरस्य सूर्यस्य यः[3] स्यन्दनस्तस्य यच्छिल्पं विज्ञानकौशलं तस्य या[4] शिक्षा परिशीलनं तया। मन्मथरथं निर्मातुं नूनमयं[5] धातुरभ्यासः। कथमेवं ज्ञातमित्याह। कीदृशो विधिः? पृथुर्विशालो वर्तुलः परिणाहीयस्तस्या नितम्बस्तस्य कृत् कर्ता। मन्मथ-[6]रथमेवंविधं[7] निर्मातुं नूनं विधिश्चक्राकारं भैमीनितम्बं करोतीति भावः। अत्राप्याक्षेप[8] एव पर्यवस्यति ॥३६॥

तरुमूरुयुगेन सुन्दरी किमु रम्भां परिणाहिना परम्।

तरुणीमपि जिष्णुरेव तां धनदापत्यतपःफलस्तनीम् ॥३७॥

भैमी परिणाहिना विशालत्वोपलक्षितेन ऊर्वोर्द्वयेन किमु न परं केवलं तरुं तरुरूपां रम्भां जिष्णुः, किं तु तरुणीं स्त्रीमपि रम्भां जिष्णुः।

1. B1. समानत्वात्.
2. B2. om. च.
3. B2. स्यन्दनः.
4. B2. om. या.
5. B2. -मियं.
6. B2. मन्मथमेवं-
7. B1. विधि.
8. B2. प्राक्षेप.

कां तरुणीमित्याह। धनदस्यापत्यं नलकूबरस्तस्य यत् तपस्तस्य फले स्तनौ यस्यास्ताम्। तेन हि तत् तपस्तप्तं येन तदप्सरोरत्नं लब्धम्। रम्भा करली स्वर्वेश्या च ॥३७॥

जलजे रविसेवयैव ये पदमेतत्पदतामवापतुः।
ध्रुवमेत्य रुतः सहंसकीकुरुतस्ते विधिपत्रदम्पती ॥३८॥

मानसादिषु जलाशयेषु सर्वकाल[1]गौणमुख्यभावेन सहवासिनां हंसानां सरोजानां च वच्याप्यजलाशयेऽपि सहावस्थानं युक्तमेव, किं त्वत्र जाति-विशेषे सन्देहस्तत्र कविरूहते। एते अपूर्वे भैमीपदरूपे के जलजे साभवतः एतदाश्रितौ हंसौ च कावेतौ अपूर्वौ भवताम्। अहमेवं जाने। ये द्वे जलजे सूर्यभक्त्यैव भैमीपद[2]रूपं स्थानं लेभाते, ते [3]जलजे कर्मतापन्ने नूनं विधि-पत्रदम्पती ब्रह्मवाहनरूपहंसजायापती एत्य प्रीत्या स्वयमागत्य सहंसकी-कुरुतः हंसकयुक्तौ विधत्तः। तथा रुतः [4]नदतः मधुरं वा शेते। हंसी च हंसश्च हंसौ। हं-[50.a]सावेव हंसकौ। सह हंसकाभ्यां वर्तेते सहंसके। असहंसके सहंसके कुरुतः सहंसकीकुरुतः। अत्र च्छलपक्षे हंसो मरालः। तत्त्वतस्तु हंसकः [5]पादकटकः। स च चरणचेष्टया तत्र वर्तमानो झणत्करोति। स च झणत्कारः कोऽप्यपूर्वोऽस्मिन् चरणसमाश्रिते सौवर्णे हंसकयुगलेऽनु-भूयते। तत् कावेताविह [6]क्षिप्तौ [7]विधियुग(्म)हंसौ विना सम्भवतः। सरोजद्वयं चान्यदिह न सम्भवत्युक्तादृते। [8]विधिपत्रे हंसौ ते च ते दम्पती च विधिपत्रदम्पती जायापतिव्यवहारिणौ हंसावित्यर्थः। तौ किलाविनाभावेन द्वन्द्वचरौ। अत्र च द्वित्वमात्रमेव विवक्षितम्। नत्ववान्तरः स्त्रीपुरुषगतः स्वरसंस्थानादिविशेषः।

---

1. B. सर्वे कालं. 3. B1. जले. 5. B2. पदे— 7. B1, B2, B. —युग्म.
2. B1. —सूपं. 4. B1. नदन: 6. B2. क्षितौ. 8. B2. वधि—

पुमान् हि स्वरेण विशेषतश्चाकृत्या सर्वत्र स्त्रीतो[1] विशिष्यते, एतत्पदतयोः[2]
पदस्य च द्वयोः स्वलिङ्गावस्थितिः। इयमुक्तिस्तु युक्तैव। यथा- अनेन
यज्ञेन किं पदं प्राप्यते? इति पृष्टः प्रत्याह- देवत्वम्। देवत्वमित्युक्ते च
देवस्थानं प्राप्यते। भायानयने द्रव्यानयनमिति न्यायात्। अत्र तु साक्षात्का-
-रेणैव पदप्राप्तिः। श्लेषः ॥३८॥

श्रितपुण्यसरःसरित्कथं न समाधिक्षपिताखिलक्षपम्।
जलजं गतिमेतु मञ्जुलां दमयन्तीपदनाम्नि जन्मनि ॥३९॥

जलजं कर्तृ मञ्जुलां गतिं कथं नैतु? अपि तु रम्यावस्थां प्राप्नोतु। क्व?
जन्मनि अवतारे। कस्मिन्? दमयन्तीपदनाम्नि दमयन्तीपदनाम्नि दमयन्ती-
-पदमिति नाम संज्ञा, यस्मिन्। अन्यद्धि जन्म जडात्। अतोऽस्य यौगिकं
जलजमिति नाम। अत्र तु राज्ञो जातत्वाद् राजजमिति यौगिकनामसम्भवेऽपि
डिच्छडविच्छादिवदस्यैतन्नाम।[3] ननु कथमस्य मञ्जुलगति प्राप्तौ, तदानुगति-
-रित्याशङ्क्य हेतुगर्भं विशेषणद्वयमाह। श्रितानि पुण्यानि तीर्थभूतानि सरांसि
मानसादीनि सरितश्च गङ्गाद्या येन तत् तथा। एतच्च प्रत्यक्षम्। तथा
समाधिना निमीलनोपलक्षितेन योगेन क्षपिता अतिवाहिता अखिला पूर्णा
[4] क्षपा निशा येन तत् तथा। तीर्थसेवासमुद्भवं हि सुकृतं स्वर्गादिप्राप्तिकृत्।
योगजनितं तु मोक्षदम्। अनेन तु द्वयमनुष्ठितमतोऽस्य युक्तैवेयमीदृशी
श्रेयसी गतिः। इति छलेनार्थः। तत्त्वतस्तु गतिर्गमनं मञ्जुला मनोज्ञा हंस-
-गजगत्यनुकारात्। तथा सरःसरितोः सम्भवात् तदाश्रयणमस्त्येव। समाधिश्च
लक्षणया सङ्कोचः ॥३९॥

1. B1. विशेष्यते. 2. B1. पतत्पदतयाः. 3. B1. विपिच्छादि- 4. B2 निशा क्षपा.

सरसीः परिशीलितुं मया गमिकर्मीकृतनैकनीवृता ।

अतिथित्वमनायि सा दृशोः सदसत्संशयगोचरोदरी ॥४०॥

विविधजलाशयसेवनस्पृहया तं तं जनपदमुपगच्छता मया साऽतितनुमध्या सुधाभिरभिषिच्यमानाभ्यामिव लोचनाभ्यां निपीतेति वाक्यार्थः। सच्चासच्च सदसती, तद्रूपः संशयः, तस्य गोचरो विष[50.b]य उदरं यस्याः सा। [1] एतत् सदुदरमुपलक्ष्यते। सदसदिति संशयो यस्या उदरे जायत इत्यर्थः। मया कीदृशेन? गमेर्धातोः कर्मवाप्यं गमिकर्म। अगमिकर्म गमिकर्मकृता गमि-कर्मीकृता। अनेके नीवृतो जनपदा येन स तथा। तेन अनेकान् जनपदान् गच्छतेत्यर्थः। अत्र च पदार्थे वाक्याभिधोक्ति,[2] भङ्गिविशेषश्च कवेः प्रौढिः॥४०॥

अवधृत्य दिवोऽपि यौवतैर्न सहाधीतवतीमिमामहम्।

कलमस्तु विधातुराशये पतिरस्या वसतीत्यचिन्तयम् ॥४१॥

तु पुनः अहमेवमचिन्तयं, ममैवंरूपा चिन्ता जाता। इति कथमित्याह। विधातुराशये विधेर्मनसि। अस्याः कृते कः प्रकृष्टः पतिर्वसति, एनां केन पत्या सार्धं धाता सन्धास्यतीति मम विचारोऽभूदित्यर्थः। किं कृत्वा? अवधृत्यावधार्य। काम्? इमाम्। कीदृशीमवधृत्येति विधेयमाह। न अधीत-वतीम्। कथं? सह। कैः? युवतीसमूहैः। कस्याः? दिवोऽपि स्वर्गस्यापि। अन्यासां [3] नागनगरनाथादिकन्यानां कथैव केत्यपि शब्दार्थः। लक्षणया रम्भा-द्यप्सरोवृन्देनापि न सदृशी, ततोऽप्यतिसमधिकरूपातिरेकामित्यर्थः।

---

1. B1, B. om. एतत् ------ गमिकर्म।
2. B1. om. -क्ति.
3. B1. नागनर-

सदाध्यायिनः समानगुणा भवन्तीति सर्वजनविदितम् । अवधृत्येति धृञोऽ-
-निर्ने ( ), तस्य रूपमवधार्येत्यर्थे । अवधार्येति तु धारेश्चौरादिकस्य
रूपम् । अवधृत्य निश्चित्येत्यर्थः ॥७१॥

अनुरूपमिमं निरूपयन्नथ सर्वेष्वपि पूर्वपक्षताम् ।

युवसु व्यपनेतुमक्षमस्त्वयि सिद्धान्तधियं न्यवेशयम् ॥७२॥

अथाहं त्वयि विषये सिद्धान्तधियं न्यवेशयमुत्तरबुद्धिं स्थापितवानस्मि । कीदृशोऽहम् ? अक्षमोऽशक्तः । किं कर्तुम् ? व्यपनेतुं व्यपोहितुम् । काम् ? पूर्वपक्षतां, प्राश्निकत्वम् । केषु ? युवसु वयःस्थेषु । कियत्सु ? सर्वेषु यथा-
-शक्ति[1] त्रिभुवनस्थेषु । किं कुर्वन् ? निरूपयन् निर्धारयन् चिन्तयन् । कम् ? इमं विधिनोपगतं[2] भैमीपतिम् । कीदृशम् ? अनुरूपं योग्यम् । यो यो युवा मनसा प्रत्यक्षीकृतः साक्षाद् वा तस्य दमयन्तीमनुसन्धाय गुणदूषणादिविमर्शे[3] क्रियमाणे दूषणान्यतिरिच्यन्ते स्म । भवति तु तद्योगयोग्या गुणसामग्री समुपलब्धेत्यर्थः ॥७२॥

अनया तव रूपसीमया कृतसंस्कारविबोधनस्य मे ।

चिरमप्यवलोकिताद्य सा स्मृतिमारूढवती शुचिस्मिता ॥७३॥

सा चारुहासिनी बहुकालदृष्टाऽप्यद्य मम स्मृतिमारूढा । मयाऽद्य स्मृतेत्यर्थः । कीदृशस्य मे ? कृतसंस्कारस्य परिचयस्य विबोधनं जागरणं पूर्वपाटवं यस्य । कया ? अनया अनुभूयमानया । तव रूपसीमया सौन्दर्यावधिना । यथैव भवान् युवसु रूपस्यावधिस्तथैव सा युवतीषु । प्रत्यभिज्ञानमेतत् । तथा च तस्य लक्षणम् । दर्शनस्मरणसंकलनं प्रत्यभिज्ञानम् ।

---

1. 8 -युक्ति. 2. B2. विधिमनोगतं. 3. B1. -रूपणादि-

"केनापि मध्यदेशवासिना हिमवन्तं गतेन तत्र गवयो दृष्टः परिचितश्च । स च कियन्तमिव कालं तत्र स्थित्वा निजनगर-[51.a]-मागतः शनैर्विस्मृत--वांश्च गवयम् । अथ कदापि क्वापि सर्वथा गवय सदृशी गौस्तेन दृष्टा । ततः स स्मृत्वा प्राह[1] – यथैवं गौस्तथैव गवयः" इति ॥४३॥

त्वयि वीर विराजते परं दमयन्तीकिलकिञ्चितं किल ।
तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम् ॥४४॥

हे वीर ! किल सम्भावयामि दमयन्त्या भैम्याः किलकिञ्चितं[2] स्मितरुदितादिभावसङ्करः, परं केवलं त्वयि विराजते, भवद्विषये विद्योतते[3] । न त्वन्यस्मिन्[4] वस्तुनि[5] । एतस्यार्थस्य स्थिरीकरणाय सदृशं वस्त्वन्तरमुपन्यस्यति । यतः मणीनां ये हारास्तेषामावलिः पङ्क्तिः श्रेणिस्तस्या रामणीयकं चारुत्वं तरुण्या एव युवत्या एव स्तने कुचे एव दीप्यते, कान्तिं लभते, नान्यत्र । किलकिञ्चितलक्षणं यथा–

रतिक्रीडाद्यूते कथमपि समासाद्य समयं
मया लब्धं तस्याः क्वणितकलकण्ठार्धमधरे ।
कृतभ्रूभङ्गासौ द्रुतचकित[6]मोहार्धरुदित-
स्मितक्रुद्धोद्भ्रान्तं पुनरपि विदध्यान्मयि सुखम्[7] ॥

एतत् तस्य लक्षणमिति ॥४४॥

---

1. B1. प्रत्याह.
2. B2. किलि किंचिता.
3. B1. धोतते.
4. B2. त्व अस्मिन्.
5. B1. थुनि.
6. B. –चकिंतु–
7. B1. मुखम्.

तव रूपमिदं तया विना विफलं पुष्पमिवावकेशिनः ।

इयमृद्धधना वृथावनी स्ववनी सम्प्रवदत्पिकापि का ॥४५॥

तव रूपं भवत्सौन्दर्यं भैमीं विना[1] विफलं, निरर्थकम् । किमिव[2] कस्येत्याह । अवकेशिनो वन्ध्यवृक्षस्य कुसुमं यथा विफलं फलरहितमिति शब्दमात्रतः साम्यं, नार्थतः । नलपक्षे हि फलं प्रयोजनम् । तरुपक्षे तु सस्यम् । तथा इयमवनी भूरपि वृथा निरर्था । कीदृक् ? ऋद्धधना स्फीत-करितुरगादिसम्पत् । किञ्च इयं[3] स्ववनी निजा वाटिकाऽपि का । काक्वा न काऽपि, साऽपि वृथैवेत्यर्थः । सा कीदृशी ? सम्यक् प्रवदन्तः कूजन्तः प्रबोधन्तः[4] इव पिकाः कोकिला यत्र सा । सौन्दर्यं, यौवनं, रूपादिविषय-साधनमृद्धश्च सदृशीं वधूं विना न किञ्चिदेवेति विलोभ्य प्रवर्तनम् ॥४५॥

अनया सुरकाम्यमानया सह योगः सुलभस्तु न त्वया ।

घनसंवृतयाम्बुदागमे कुमुदेनेव निशाकरत्विषा ॥४६॥

भवतु दूतमुखेन तत्पितरमभ्यर्थ्य रहसि वा हेतुभिः प्रलोभ्य तामहं निजपाणिगतां करिष्यामीत्याशङ्क्याह । तु पुनः भैम्या देवैरभिलष्यमाणया सह तव मर्त्यस्य[5] योगो न सुप्रापः[6] । अम्बुदागमे वर्षर्तौ मेघैः स्थगितया चन्द्रकान्त्या सह कैरवेणेवेति विलम्बिनी प्रयत्नसाध्या तत्प्राप्तिः सूचिता ॥४६॥

तदहं विदधे तथा तथा दमयन्त्याः सविधे तव स्तवम् ।

हृदये निहितस्तया भवानपि नेन्द्रेण यथाऽपनीयते ॥४७॥

---

1. B1. विनाऽफलं.
2. D. कमिव.
3. D. अयं.
4. B1. प्रबोधयन्तः.
5. B2. मत्यास्य.
6. B2. सुप्रायः.

यस्मादेवं तस्मादहं गत्वा भैम्याः समीपे [51.b] तेन तेन प्रकारेण भवतो वर्णनं करोमि। येन प्रकारेण तथा चित्ते न्यस्तः सस्त्वं शक्रेणापि न दूरी-क्रियस इति भाविशक्राद्यभियोगेन सूचनम्। विदध इति भविष्यत्समीप-वर्ती वर्तमानः ॥४७॥

तव सम्मतिमेव केवलामधिगन्तुं धिगिदं निवेदितम्।

ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम् ॥४८॥

इदं निवेदितं[1] धिक्, निन्द्यमिदं निवेदितमित्यर्थः।[2] किं कर्तुं निवेदितम्? केवलामेकां तव सम्मतिमेव भवदनुमतमेव अधिगन्तुं ज्ञातुं, न त्वत्र निवेदने हेत्वन्तरमस्ति। अथवा धिगिति सामान्येन धिक्कष्टं मया न भव्यं कृतम्। केवलं तवानुमतमेव ज्ञातुमिदं निवेदितमिति काकुगर्भो वाक्यार्थो-ऽनुभवगम्यः। यस्मान्महात्मानः स्वोपकारितां साध्येन वदन्ति,[3] न तु गलेन। सस्ये हेतुकृते चार्थे फलशब्दः प्रवर्तते ॥४८॥

तदिदं विशदं वचोऽमृतं परिपीयाभ्युदितं द्विजाधिपात्।

अतितृप्ततया विनिर्ममे स तदुद्गारमिव स्मितं सितम् ॥४९॥

स नलः सितं स्मितं चकार। किं कृत्वा? तत् तादृशगुणमिदं प्रत्यक्षं वचनपीयूषं द्विजाधिपात् पक्षिराजः सकाशात् समुद्गतं सादरं श्रुत्वा। अथ च श्लेषोक्त्या द्विजाधिपात् चन्द्रात् निपीय। कथा? अतितृप्ततया। यथेच्छं उत्प्रेक्षते। तस्योद्गारमिव सशब्दमुद्वमनमिव। अतितृप्ततया दुग्धादि पीत्वा-ऽन्योऽप्यवश्यमुद्गारं करोति। स्मितशब्देनैव सितत्वे लब्धे सितशब्दो-पादानममृतोद्गारतयोत्प्रेक्षणार्थम् ॥४९॥

---

1. B2. मैथेदित — 2. B2. repeats किं कर्तुं निवेदितम्. 3. B1. वन्दिति.

परिमृज्य भुजाग्रजन्मना पत्रगं कोकनदेन नैषधः।
मृदु तस्य मृदेऽकिरद्गिरः प्रियवाग्मृतकूपकण्ठजाः ॥५०॥

भुजाग्रे जन्म यस्य तेन रक्तोत्पलेन शनैः पक्षविकृतिनिवेशनपूर्वं स्पृष्ट्वा प्रियवाद एवामृतं, तस्य कूपो यः कण्ठस्तस्मादुत्पन्ना ईसप्रीत्यै शनैर्वाच, उवाच। भुजाग्रजन्मकोकनदं लोहितपाणिः ॥५०॥

न तुलाविषये तवाकृतिर्न वचोवर्त्मनि ते सुशीलता।
त्वदुदाहरणाकृतौ गुणा इति सामुद्रिकसारमुद्रणा ॥५१॥

तवाकृतिस्तुलाविषये न भवतोऽवयवानां संस्थानं तुलयितुं न शक्यते, भूयस्त्वात्। ते सुशीलता स्वभावमाधुर्यं वचोवर्त्मनि न वर्तते। वक्तुमपि न शक्यते। अत्रापि भूयस्त्वमेव हेतुः। किञ्च आकृतौ गुणा इति एवंरूपा (या) सामुद्रिकस्य शास्त्रविशेषस्य या सारा प्रधानभूता मुद्रणा चिह्नकरणं, सा त्वदुदाहरणा भवन्निदर्शना। स्त्रीपुरुषयोः शुभाशुभ--सूचककरचरणरेखादिकथनप्रधानं शास्त्रं [52.a] सामुद्रिकम्। तत्र ह्येवं स्थितं — "यत्राकृतिस्तत्र गुणा वसन्ति"। अयमेव च तत्र सारः। यथा च तत्र सूचितं, तथा त्वयि दृश्यते। त्वयि खल्वाकृतिरस्ति, गुणाश्च सन्ति। सूत्रस्यार्थो ह्युदाहरणेन प्रतीयते ॥५१॥

न सुवर्णमयी तनुः परं ननु किं वागपि तावकी तथा।
न परं पथि पक्षपातिताऽनवलम्बे किमु मादृशेऽपि सा ॥५२॥

ते परं केवलं तनुरेव न सुवर्णमयी हैमी। ननु भोः वागपि तथा इति। सुवर्णमयी हैमीति लोकोक्तिः। तत्त्वतस्तु शोभनाक्षरमयी।

किञ्च केवलं अनवलम्बे पथि असद्भूतत्वान्निराश्रये आकाशलक्षणे मार्गे न पक्षपातिता पतत्रगामिता मादृशोऽप्यनवलम्बे सा पतत्रगामितेतीयमपि छलोक्तिः। तत्त्वतस्तु नलपक्षे अनवलम्बे असहाये पक्षपातिता स्वीकारबुद्धिः। पक्षः सहाये-ऽपीत्यनेकार्थकोशे। पक्षैः पततीति पक्षपाती, [1]तस्य भावः पक्षपातिता। पक्षे सहाये पातो ममायमिति बुद्धिः पक्षपातः, स विद्यते यस्येति पक्षपाती। पक्ष-शब्देन वा मम वामं वा समीपमुपलक्ष्यते। तत्र च पतनं विरोधि बाधायां त्वरितमवस्थानम् ॥५२॥

भृशतापभृता मया भवान्मरुदासादि तुषारसारवान्।
धनिनामितरः सतां पुनर्गुणवत्संनिधिरेव सन्निधिः ॥५३॥

मया अत्यर्थं सन्तप्तेन भवान् जल[2]कणवाही वायुः प्राप्तः। ननु मम तिरश्चः सङ्गमेन भवतः क्षितिपतेः कथमेवं परितोष इत्याह। धनवतामितरः शङ्खपद्मादिकः सन् श्रेष्ठो निधिर्निधानम्। ते हि तेन सुखिनो भवन्ति। महात्मनां तु गुणवतां सन्निधिः समीपस्थितिरेव शोभनो धनसञ्चयः। ते हि तत एव सर्वार्थसिद्धिसुखमुपलभन्ते। ग्रीष्मे खर[3]किरणकिरणसंसर्गा-द्दावादिवह्निसन्निधेर्वायुः खल्वत्यन्तसन्तप्तो भवति, सोऽवश्यमेवंविधं गन्धवहमासाद्य [4]सद्यः परां निर्वृत्तिमापद्यते। तुषारो [5]हिमस्तस्य सारः स्थिरांशस्तद्वान् मरुत् साक्षादचिन्तितोपनतः कश्चिद्देवः। पक्षे तुषाराः शीकराः। एतेनार्थान्तरन्यासेन सूक्ष्मदृष्ट्या विमृश्यमानेन नलेन स्वात्मनि [6]महत्त्वमारोपितं, धनिषु [7]चामहत्त्वम्। 'अहं साधुस्ततस्तव सन्निधिना हृष्टो, धनिनस्तु निन्द्या ये धनैकपरायणा' इति।

---

1. B2. om. तस्य ----पातिता। 2. B2. -वचेण-. 3. B2. om. -किरण-
4. B2. om. hapl. सद्यः. 5. B1. हिमं. 6. B1. सहत्त्व- 7. B2. च महत्त्वम्।

एतच्च विसदृशमिव । महात्मनो हि स्वस्य महत्त्वं स्वेनैव न वर्णयन्ति, न च निन्द्यार्हमपि परं निन्दन्ति । नैवम् । नलेन स्वमनुसन्धाय नोक्तम्, अपि तु सामान्यव्यवहार एवार्थः प्रदर्शितः । स त्वेवं प्रतिपाद्यः । सतां सङ्गमेनैव तुष्यतां पुंसां महत्त्वमायाति, न तु[1] धनाय ॥ ५३ ॥ [52.b]

यतशः श्रुतिभागतैव सा त्रिजगन्मोहमहौषधिर्मम ।
अमुना तव शंसितेन तु स्वदृशैवाधिगतामवैमि ताम् ॥ ५४ ॥

सा सर्वैर्गुणैस्त्रिभुवनं मोहं नयन्ती, जयतीति मया बहुकृत्वः श्रुतमेव । अमुना भवत आप्तस्य वर्णनप्रधानेन वचनेन[2] प्रत्यक्षीकृतामेव[3] जानामीति । मोहाय महती दृष्टप्रभावा प्रकटित[4]महाशक्तिरौषधिर्लतामूलादिका, तत्कार्यकरणात् सैव सा ॥ ५४ ॥

अखिलं विदुषामनाविलं सुहृदा च स्वहृदा च पश्यताम् ।
सविधेऽपि न सूक्ष्मसाक्षिणी वदनालङ्कृतिमात्रमक्षिणी ॥ ५५ ॥

पूर्वार्धस्यासम्भववचनशङ्कयाह । पण्डितानां समस्तं निःसन्देहम् । किं कुर्वताम्? पश्यताम् । केन? सुहृदा आप्तेन, तथा स्वहृदा निजमनस्तर्केण । [5]नन्वागमानुमानाभ्यां सकाशात् प्रत्यक्षं बलीयस्तत् किमिति तदुपसर्जनपक्षे प्रक्षिप्य प्रोच्यते भवता । तल्लक्षणविचक्षणेनेत्याशङ्क्य च्छलोक्त्या प्रत्यक्षस्याबलीयस्त्वं प्रत्यक्षीकरोति । अक्षिणी दृशौ सविधेऽपि समीपेऽपि वर्तमाने कस्मिंश्चित् परमाण्वादौ न साक्षिणी प्रत्यक्षकृती[6] । प्रत्यक्षं हि तदुच्यते यत्स्वयं दृश्यते, तच्च सूक्ष्मवस्तुन्यसमर्थम् ।

1. B. तु. 2. B2 om. वचनेन. 3. B2, B. —कृतामपि च.
4. B2. महौषधिं. 5. B. न त्वागम— 6. B. प्रत्यय—

आप्तवचनानुमानाभ्यां तु दृविष्टमपि स्वर्गादि प्रतीयते। ततस्ते एव बलीयसी। 'अथ च सूक्ष्मं कज्जलं अविधेऽपि वर्तमानं चक्षुषी न पश्यतः। इत्यनुभवसिद्धम्। लोकोक्तिरप्यस्ति - "सर्वः कोऽपि दूरस्थं पश्यति, न निकटस्थम्" इति। तत्र त्वतिपरिचयादिहेतुः ॥५५॥

[1]अमितं मधु तत्कथा मम श्रवणप्राघुणकीकृता जनैः।
मदनानलबोधने भवेत् खग! धाय्या धिगधैर्यधारिणः॥५६॥

हे खग! तस्याः कथा मम मदनानलबोधने कामाग्न्युद्दीपननिमित्तं धाय्या अग्निसमिन्धनप्रयोजनं सूक्तमभूत्[2]। या किं वस्तु तदाह[3]। मधु क्षौद्रं तत् कार्यकरणात्। कीदृशी सती? जनैर्लोकैः श्रवणयोः अप्राघुणकी प्राघुणकीकृता श्रोत्रातिथीकृता। जना हि पृथग्लोकास्ते यथावद् वर्णन-पुरःसरं कथयितुं न जानन्ति। मम तु तथापि प्रेमवशात् तत्रादरः। प्राघुणकस्त्वतिथिस्तत्र सर्वेऽप्याद्रियन्ते। अथवा प्रथमत एवार्थान्तरन्यासः साध्यतया व्याख्येयः। यथा - हे खग! अधैर्यधारिणः पुरुषान् धिक्! कुतस्ते कुत्स्या इत्यत्र हेतुः। यतो अधैर्याधिष्ठानान्ममेदृगवस्थेति। प्राघुणकोऽतिथिः। स च स्वतो हीनोऽपि सत्क्रियते। इयं तु स्वत्वभी-ष्टमानिनी विशेषतो मान्या। अन्यापि कापि कस्यापि गृ-[53.व]-हमागच्छन्ती नगरसमीपमुपगता। यदि जनैरागत्य आख्यते, तदा तद्भोजनसामग्रीसम्पादनार्थं सम्भ्रमेणाग्निः प्रबोध्यते, तत्राप्यधैर्यं निन्द्यं, तत्रागमनस्यानिश्चितत्वात्। एवंभूता जनचेष्टा कदापि मिथ्याऽपि भवति। "ऋक्सामिधेनी धाय्या च या स्यादग्निसमिन्धनी[4]" [इत्यमरः] ॥५६॥

1. B2. अनितं. 2. B2. सूक्तमभवन्. 3. 8. तदाहुः. 4. B1. समिन्धने.

विषमो मलयाहिमण्डलीविषफूत्कारमयो मयोहितः।
खग! कालकलत्रदिग्भवः पवनस्त्वद्विरहानलैधसा ॥५७॥

हे खग! कालो मृत्युस्तस्य कलत्रं लक्षणया[1] भोग्याया दिग्दक्षिणा तज्जः पवनो वायुर्मलयाद्रेरहिमण्डलीनां विषमिश्रितो यः फूत्कारस्तन्नि-
-र्वृत्तस्तर्कितः। कुत इत्याह। हेतुगर्भं विशेषणम्। यतो विषम विषं मयते प्रतिददातीति विषमः। मेङ् प्रतिदाने ( ? )। यद्ययं तथा न भवेत्
तत्कथं मतीवं विषं दद्यात्। पवनात् पवित्रीकरणात् पवनोऽयं पदार्थः।
यद्यत्र संसिद्धिसिद्ध एव विषसंसर्गो भवेत्, तदा पवनसंस्पर्शं[2] लभेत। दा/
तस्मादस्मादेवं संविधानादस्य विषप्राप्तिः। सा च भूयसी कुण्डलिमण्डली-
-मुक्तफूत्कृति शतनिर्वृत्तत्वात्। कीदृशेन मया? भैम्या वियोग एवाग्निस्तस्ये-
-न्धनेन ज्वलदनलपतितेन्धनदशानुभावात्। कालकलत्रेत्यादिसामग्रीसाभिप्रायता
त्यतीव वैषम्यमाह। तत्त्वतस्तु वैषम्यं दुःसहत्वमेवास्य वायोः ॥५७॥

प्रतिमासमसौ निशापतिः खग सङ्गच्छति यद्दिनाधिपम्।
किमु तीव्रतरैस्ततः करैर्मम दाहाय स धैर्यतस्करैः ॥५८॥

प्रतिदर्शं यश्चन्द्रयोगः स्वत्वागमात् प्रतीतस्तमन्यथैव तर्कते। हे खग!
एष शशी मासे मासे यद्दिनाधिपं गच्छति, सूर्यं प्राप्नोति, रविणा
संसृज्यते, स किं ततस्तपनसङ्गमादतितीक्ष्णैः करैर्मम दाहाय मां दग्धुम्[3]।
कीदृशैः करैः? सत्यापहारकैः। अन्योऽपि कश्चिद्यदि कञ्चन दग्धुमिच्छति,
तत्सहजोष्णमपि हस्तं वह्निसंयोगादुष्णतरं करोति। चन्द्रस्य करेषु क्षीण-
-त्वादुषितौष्ण्येष्वपि नूतन[4]स्यौष्ण्यमतीवाधिक्यं भवति विरहिणः प्रति गमे;

---

1. B2. क्षणया. 2. B1. न लभेत. 3. B1. दग्धुम्. 4. B1. नूतन.

सम्पूर्वकस्याकर्मकस्यैवात्मनेपदम् । अत्र त्वर्थं सकर्मकः प्राप्त्यर्थः ॥५८॥

कुसुमानि यदि स्मरेषवो, न तु वज्रं, विषवल्लिजानि तत् ।
हृदयं यदमूमुहन्नमूर्मम यच्चातितरामतीतपन् ॥५९॥

स्मरः कुसुमेषुरिति नूनं निरन्वयैव संज्ञा । यथा राजधर्मरहितोऽपि कश्चित् [1]पितृमातृकुलराजसंज्ञः । तर्हि कास्तस्येषव इत्याह । अहं मन्ये स्मरेषवो वज्रमेव तत्कार्यकरणात् । न तु कुसुमानि । यदि च स्मरेषवः कुसुमान्येव, [2]न तु वज्रं, तर्हि कुसुमानि वि-[53·b]-षवल्लिजानीति प्रतिज्ञा । ननु तत्र को हेतुरित्याह । तत् तस्मात् हेतोः । तस्मात् कस्मा-दित्याह । यद्यस्मादमूः स्मरेषवो [3]मम हृदयममूमुहन् मोहयन्ति स्म । यस्माच्चातिशयेनातीतपन् तापयन्ति स्मेति । एतद् द्वयं हि विषकार्यम् ।

तदिह त्वनवधौ निमज्जतो मम कन्दर्पशराधिनीरधौ ।
भव पोत इवावलम्बनं विधिनाकस्मिकसृष्टसन्निधिः ॥६०॥

तदित्यु[4]पसंहारहेतौ वा । तस्मात् त्वं ममावष्टम्भनमाश्रयणीयं हस्तग्राह्यं वा वस्तु सम्पद्यस्व । कीदृशस्य ? [5]निःसीमि स्मरशरव्यथापाथोधौ ब्रुडतः । कीदृशस्त्वम् । विधिना शुभकृता दैवेन कृताऽचिन्तितसंघटनः । क इव ? पोत इव यानपात्रवत् । यथा कस्यापि [6]निःसीमेऽब्धौ ब्रुडतो दैववशादुपनतः पोतः [7]खल्ववलम्बनं भवति । विधिर्नलपक्षे संविधानकं वा । यथा – तया सह मम लघु सङ्गः स्यात् तथा विधीयताम् इति भावः ॥६०॥

---

1. B1. पितु॰ 2. B2. ननु॰ 3. B2. मन – . 4. B2. –संहारे– 5. B1. निःसीमनि॰
6. B1. निःसीमाब्धौ. B2. निःसीमस्योब्धौ. 7. B2. स्वत्वम्बन॰

अथ वा भवतः प्रवर्तना न कथं पिष्टमिथं पिनष्टि नः।
स्वत एव सतां परार्थता ग्रहणानां हि यथा यथार्थता ॥६१॥

अथ वेति पक्षान्तरे। इयं मया विधार्यमाना नव प्रेरणा कथं पिष्टं न पिनष्टि ? काक्वा [1] अपि तु पिष्टं पिनष्टि। अयं पिष्टपेषणन्याय एवेत्यर्थः। यस्मादुत्तमानां परकार्यता स्वत्वात्मनः एव। न हि सन्तः केनापि प्रेरिताः सन्तः परकार्ये [2] प्रवर्तन्ते। अपि तु स्वभाव एवायं तेषां यत्परकृत्य--सम्पादनजागरूकता। कथं न पिष्टं न पिनष्टीति द्वौ नञौ प्रकृतमर्थं ब्रूतः। ये तु प्रथमपद्यार्धगतं नञं, भ्रान्त्या विसर्गान्तं पठन्ति-'नोऽस्माक--मिथं प्रवर्तना' इति च व्याचक्षते, ते खलु स्थूलदृशः। प्राकरणिकस्या--स्मदर्थस्यैकत्वेनैवोक्तत्वात् तदा 'मे' इत्येव कुर्यात्, तथा च कृते स्वत्वस्थानस्थपदत्वलक्षणमापतेत् [3]। एवं हि सति सन्निहितेन 'पिष्टम्' इत्यनेन सार्धं सबन्धो भवेत्, न तु [4] प्रवर्तनया। इयं भवतः प्रवर्तना कथं मम पिष्टं न पिनष्टीति। अस्थानस्थपदत्वं तु महाकवीनामपि दृश्यते, किं तु यत्र व्यवधानेऽप्यन्यथा वाक्यार्थस्याघटना यथायुक्ति पदसंबन्धः। यथा बाणस्य —

मा भाङ्क्षीर्विभ्रमं भ्रूरधरविधुरता केयमास्यास्य रागं
पाणे प्राण्ये बनायं कलयसि कलहश्रद्धया किं त्रिशूलम्।
इत्युद्यत्कोपकेतून्प्रकृतिमवयवान् प्रापयन्त्येव देव्या
न्यस्तो वो मूर्ध्नि मुष्यान्मरुदसुहृदसून् संहरन्नङ्घ्रिरंहः ॥[ ]

1. B2. om. अपि --- पिनष्टि। 2. B1. प्रवर्तिताः marginalia
3. B1. लक्षणमात्र पतेत्, B2. लक्षणं दूषणमापतेत्. 4. B2. प्रवर्तनाय.

अत्र हि 'देव्या न्यस्तो वो मूर्ध्नि' इति पदविन्यासेऽथ इति पदमस्थानस्थम्। तस्य ह्यस्माकमित्येतत् पदार्थवाचिना दूरवर्तिनाप्यहं इ-[54.a]-त्यनेन कर्मणाभिसंबन्धो, न तु सन्निहितेनापि मूर्ध्नीत्यनेन। तेन हि समासस्थस्यापि मरुदसुहृदो महिषस्य संबन्धोऽन्यथा वाक्यार्थस्याघटनात्। अत्र तु 'मे'[1] इत्यस्य प्रवर्तनया सह संबन्धं[2] विनाऽपि पिध्यमित्यनेन सान्निध्यान्मुख्यतया संबन्धे विधीयमाने न काचिद् वाक्यार्थघटनाविघटना विनाऽपि चात्र संबन्ध--परेन प्रकरणात् तदर्थः प्रतीयते। इयं मया कार्यमाणा भवतः प्रवर्तनेत्यर्थः॥६१॥

तव वर्त्मनि वर्ततां शिवं पुनरस्तु त्वरितं समागमः।

अयि साधय साधयेप्सितं स्मरणीयाः समये वयं वयः॥६२॥

भवतोऽध्वनि क्षेममस्तु, भूयः शीघ्रं संयोगोऽस्तु, अर्थादावयोः। अयीति रुचिलोक्तौ। अभिलषितं साधय साधय सम्पादय सम्पादय इति लौकिकोक्ति--समाश्रयणेन मङ्गलार्थक्रिया[3]पदस्य सम्भ्रमे वीप्सा। हे वयः, पक्षिन्। समयेऽवसरे वयं [स्मरणीयाः] चेतसि धर्तव्या इति अभीष्टस्य दूर--देशं[4] गन्तुमुद्यतस्य संवदनोक्तेर्जातिः[5]॥६२॥

इति तं स विसृज्य धैर्यवान् नृपतिः सूनृतवाग्बृहस्पतिः।

अविशद्वनवेश्म विस्मितः स्मृतिलिङ्गैः[6] कलहंसशंसितैः॥६३॥

इति एवं तं प्रस्थाप्य धैर्यवान् सन्, राजा प्रियवचोगुरुः चित्तसंस्थैर्मधुर--स्वरमरालवर्णनैर्जातविस्मयः सन् केलिकाननवेश्म प्रविष्टः॥६३॥

1. B2. इमे. 2. B2. संबन्धे. 3. B1. क्रियां. 4. B1. देशगन्तु-
5. B2. जातः. 6. B. लग्नै.

अथ भीमसुतावलोकनैः सफलं कर्तुमहस्तदेव सः ।
क्षितिमण्डलमण्डनायितं नगरं कुण्डिनमण्डजो ययौ ॥६४॥

अनन्तरं भैम्या दर्शनेन तदेव दिनं सार्थकं चिकीर्षुर्भूवलयभूषणीभूतं कुण्डिनं नाम नगरं हंसः प्रयातः ॥६४॥.

प्रस्थानसिद्धिबोधकानि निमित्तान्याह—

प्रथमं पथि लोचनातिथिं पथिकप्रार्थितसिद्धिशंसिनम् ।
कलसं जलसम्भृतं पुरः कलहंसः कलयाँबभूव सः ॥६५॥

स मानसौकाः स्वत्यादौ नेत्रप्रीतिकरं पान्थेष्टार्थनिष्पत्तिसूचकं मार्गेऽम्भःपूर्णकुम्भमग्रे ददर्श । कलसमिति चित्रानुप्रासादौ दन्त्यतालव्ययोः प्रायो न भेदः ॥६५॥.

अवलम्ब्य दिदृक्षयाम्बरे क्षणमाश्चर्यरसालसं गतम् ।
स विलासवनेऽवनीभृतः फलमैक्षिष्ट रसालसङ्गतम् ॥६६॥

स हंसो रसाले चूते सङ्गतं संलग्नं फलमैक्षिष्ट । क्व? नलस्य केलिकानने । इत्याशयप्रशान्तता शकुनस्य । किं कृत्वा? कालकलामात्रं खे गतं गमनमवलम्ब्य । खे गत्वा क्षणं स्थिरीभूय । कया हेतुभूतया? द्रष्टुमिच्छयेति पक्षिणां स्वभावोक्तिः । कीदृग्गतम्? आश्चर्यरसेनाद्भुतास्वादेनालसं मन्थरम् । आश्चर्यं चात्र तथा सत्वाधिकस्य नृपस्य भैमीगुणश्रवणमात्रेण तथा भ्रान्तत्वात् । रसातिसौरभश्चूतः । फलं सङ्गतं लग्नमिति पुष्टत्वामल्यप्रति-[54.6]-पादनपरम् । तदेव हि प्रस्थाने शुभम् । फलिका हि न तथा दृढबन्धना, न च तथा सिद्धिदा, परिणतं च विपत्तिषु शिथिलबन्धनं सिद्धेरपि स्वस्वरूपत्वमाह ॥६६॥.

नभसः कलभैरुपासितं जलदैर्भूरितरक्षुपन्नगम् ।

स ददर्श पतङ्गपुङ्गवो विटपच्छन्नतरक्षुपं नगम् ॥६७॥

स पक्षिराट् जलभृतत्वान्मेचकैरत एव गगनकरि[1]पोतनिभैरभ्रैः सर्वासु दिक्षु सेवितं नगमद्रिमपश्यत् । कीदृशम् ? भूरयो बह्वस्तरक्षवो[2] मृगविशेषाः पन्नगाश्च चन्दनतरुसमाश्रिता भोगिनो यत्र तं तथेति छायापुष्पफलप्रधानपादपादिरमणीयत्वकथनम् । एवंरूपजलदविलोकनं च फलसिद्धिसूचकम् । एवंविधेन हि जलदेनाभिवृष्य तृष्यज्जन[3]मनस्तुष्टिकरेण पुष्टिराधीयते सर्वसस्येषु । एवमन्यत्राप्यन्यदप्यभ्यूह्यम् । अन्यच्च कीदृशम् ? विटपैर्विस्तारैश्छन्नतराः स्थगिताः क्षुपा ह्रस्वशाखावृक्षा यत्रेति मायूरातपत्रध्वननपरम् । अन्योऽपि कलभकुलबलालङ्कृतः कनकपन्नगभूषितकण्ठः क्रीडामृगविशेषविनोदव्यासक्तो[4] मायूरातपत्रनिवारितातपप्रचारः परिवारः परमपुण्ययोगादेव नरदेवः प्रस्थाने नेत्रपथमवतरति । अयं च नगो[5] भूभृत् तेन च[6] लक्षितलक्षणा भङ्ग्या राजा प्रतीयते ॥६७॥

स ययौ धुतपक्षतिः[7] क्षणं क्षणमूर्ध्वायनदुर्विभावनः ।

विततीकृतनिश्चलच्छदः क्षणमालोककदत्तकौतुकः ॥६८॥

स क्षणं प्रकम्पितपक्षमूलो ययौ । क्षणमूर्ध्वेनोपरिगेनायनेन गमनेन दुर्विभावनो दुर्निरीक्ष्यः सन् । क्षणं विततीकृताः प्रसारिता निश्चलाश्छदाः पक्षा येनेत्येवंभूतः सन् क्षणमालोककानां द्रष्टृणां दत्तं निहितं कौतुकं येनैवं ययाविति दीपकम् । कौतुकं तु हैमत्वात् । तृतीयचरणान्तस्थः क्षण[8]-शब्द उत्तरचरणेनापि काकाक्षिगोलकन्यायेन सम्बध्यते ॥६८॥

---

1. B2. यगन- 2. B2. वद्ववस्तुरक्षया 3. B2. - जनमस्तुष्टि- 4. B2. व्यासक्तो 5. B2. नगोऽत्र. 6. B2. बलत्कित. 7. D. धुनपक्षतिः 8. B2. रक्षण -

तनुदीधितिधारया रयाद्गतया लोकविलोकनामसौ ।
छदहेम कषन्निवालसत्कषपाषाणनिभे नभस्तले ॥६९॥

एष नभःपृष्ठे तलभागे मेचकत्वात् कनकपरीक्षोपलसदृशे छदहेम पक्ष-सुवर्णं कषन् धृष्यन्निव्यलसत् । कतिवर्णिकं मम पक्षसुवर्णमिति कषण-पुरःसरं परीक्षमाण[1] इव दिधुते। कया कृत्वा खल्वेवं प्रत्यतादित्याह[2]। तनोः सौवर्णत्वात् दीधितीनां या धारा महती राजी, तया । कीदृश्या ? रयाद् वेगात् जनदर्शनं प्राप्तयेति । अन्योऽपि सौवर्णिको हट्टे कषपट्टिकातले परीक्षायै सुवर्णं कषन् लसति गात्रधूननपुरःसरं विचेष्टते । [55.a] सर्वेषामथमनु-भवसिद्धोऽर्थः सौवर्णिक वणिक् पथे ॥६९॥

विनमद्भिरधःस्थितैः खगैर्झगिति श्येननिपातशङ्किभिः ।
स निरैक्षि दृशैकयोपरि स्यदझाङ्कारिपतत्त्रपद्धतिः ॥७०॥

स हंसः उपरि वर्तमानोऽधस्ताद् वर्तमानैर्वर्तकादिभिः पक्षिभिरनन्यया दृष्ट्या निरीक्षितः । किं कुर्वद्भिः ? विनमद्भिरधोऽधः सङ्कुचद्ग्रीवाद्यवयवैः । यतः झगिति त्वरिततरं[3] सशब्दं श्येनस्य पक्षिणो यो निपातो, नखकोटिभि-र्ग्रहणार्थमुपरिपतनं तत् संभाविभिः । यतः स कीदृक् ? स्यदेन वेगेन झाङ्कारो विधत्ते यस्या एवंभूता पतत्त्रपद्धतिः पक्षरचना यस्येति । जातिरियम्[4] । झगित्य-नुकृतिपदं श्येननिपातेन सह समसितमेव[5] ॥७०॥

ददृशे न जनेन यन्नसौ, भुवि तच्छायमवेक्ष्य तत्क्षणात् ।
दिवि दिक्षु वितीर्णचक्षुषा पृथुवेगद्रुतमुक्तदृक्पथः ॥७१॥

---

1. Br. परीक्षण. 2. Br. प्रत्यगाद्. 3. Br. om. -तरं. 4. Br. om. जाति-
5. Br. समस्तितमेव.

एष हंसो यन्[1] गच्छन् सन् जनेन लोकेन तस्य बह्वीं छायां दृष्ट्वा दिवि खे दिक्षु चाशासु व्यापारितदृशाऽपि न दृष्टः। यतः पृथुना समधिकेन वेगेन द्रुतं झगिति त्यक्तदृग्विषयः। यन्नितीनः शतृङ् । (          ) छायाशब्दो बाहुल्ये षष्ठे ॥७१॥

न वनं पथि शिश्रियेऽमुना क्वचिदप्युच्चतरद्रुचारुतम् ।
न सगोत्रजमन्यवादि वा गतिवेगप्रसरद्रुचारुतम् ॥७२॥

कालासहत्वाद् विधेयस्यामुनाऽध्वनि क्वचिदपि काननं न समाश्रितम्। कीदृक्? अत्युच्चतराणां द्रूणां[2] वृक्षाणां चारुता मनोहरत्वं यत्रेति समाश्रयणहेतुसूचनम्। अथवा सगोत्रजं चक्राङ्गभवं रुतं वा शितं च नान्यवादि नानूक्तम्। तिर्यञ्चो हि निजजातिरवं श्रुत्वा समनुरुवन्ति। कीदृशेन? गमनतरसा प्रसरन्ती तायमाना बहुलीभवन्ति, सौवर्णत्वात् कान्तिर्यस्य तेन तथा ॥७२॥

अथ भीमभुजेन पालिता नगरी मञ्जुरसौ धराजिता ।
पतगस्य जगाम दृक्पथं हरशैलोपमसौधराजिता ॥७३॥

अनन्तरं भैमीजनकदोष्णा रक्षिता खल्वसौ मञ्जुर्मनोज्ञा[3] नगरी विदर्भाख्या हंसेन दृष्टा। कीदृशेन भुजेन? धरां भुवं[4] जयति वशीकरोतीति धराजित् तेनेति। सत्सूद्विषेति क्विप्। (          )। नगरी कीदृक्? हरशैलोपमैः स्फटिकाद्रिनिभैः सौधैर्धवलगृहै[5] राजिता शोभिता। 'भीमेन पालिता' इति वक्तव्ये भुजस्य प्राधान्यं, राज्ञां प्रजापालने तस्य प्राधान्यात्। राजानो हि बाहुं दृत्वा प्रजामावर्जयन्ति[6] ॥७३॥

---

1. B2. यतच्छन् 2. B2. द्रुणां 3. B2. -मनोभराज्ञा 4. B2. भुवि.
5. B2. सौधैवल- 6. B2. om. -जा-

दयितं प्रति यत्र सन्तता रतिहासा इव रेजिरे भुवः ।
स्फटिकोपलविग्रहा गृहाः शशभृद्भित्तनिरङ्कभित्तयः ॥७४॥

[1]तामेव वर्णयति । यत्र पुरि गृहा [2]रेजिरे, शुशुभिरे । कीदृशाः ? स्फटिकोपला-[55.b]-नां विग्रहो देहो येषां ते तथा । सितमणिमया इत्यर्थः । पुनः कीदृशाः ? चन्द्रशकलनिष्कलङ्ककुड्याः । शशभृच्चन्द्रस्तस्य भित्तं खण्डं शकलं तद्वन्निर्गताङ्काः कलङ्करहिता भित्तयो येषां ते तथा । अत एव के इव रेजिरे इत्युत्प्रेक्षमाण आह । रतिहासा इव निधुवनविहसितानीव । कस्याः ? भुवो नायिकायाः । कं प्रति ? दयितं प्रति, नाथं लक्षीकृत्य । भुवस्तु नाथो राजैव । तस्यास्तु स तत्र भीम एव । कीदृशा रतिहासाः ? सन्तताः [3]सर्वसमयस्थायिनः । गृहास्तु सन्तता निरन्तराः । रतिहासाः सन्तोषहासाः । सा हि तेन लाल्यमानाऽस्ति, तत इयं निरन्तरं हसति । अन्यापि नायिका पत्या लालिता सन्तोषात् सन्ततं हसन्ती तिष्ठति ॥७४॥

नृपनीलमणीगृहत्विषामुपधेर्यत्र भयेन भास्वतः ।
शरणार्थमुवास वासरेऽप्यसदावृत्त्युदयक्षमं तमः ॥७५॥

यत्र पुरि तमोऽध्वान्तं शरणार्थं रक्षार्थं वसति स्म । कदा ? वासरेऽपि । कीदृक् ? सदा सर्वकालमावृत्तिः [4]सदावृत्तिः । सर्वकालं गमनागमनम् । न विद्यते सदा आवृत्तिर्यस्य तदसदावृत्तिः । अत एवोदयक्षममतिशयेनोदयत् । सन्ततगमनागमनाभ्यामवश्यं कार्श्यं भवति । कुत उवास इति हेतुमाह । सूर्याद् भीत्या । कस्माद् ? उपधेर्व्याजात् । कासाम् ? नृपस्य नीलमणीनां महानीलोपलानां यद् गृहं तस्य त्विषस्तासाम् । एताः पूर्वोक्ताः

1. B1. तनेव. 2. B1. राजिरे. 3. B1. -समस्थायिनः. 4. B1. om. सदावृत्तिः

सर्वकालमितस्ततः समुल्लसन्त्यः कन्नयो न भवन्ति, अपि त्वेतत् तम एव भास्करभीत्या कारुणिकबलवदधिष्ठातृकायां पुरि रक्षायै दिनेऽपि गमनागमनश्रमाभावमेदुरं वसति। केचित् तु असत् असाध्वपि आसमन्ताद्धा वृचिराजीवनं तेनोदयदुपचीयमानं सद्वासेति व्याकुर्वते। अन्ये त्वसद्विद्य-मानमप्यावृत्त्युदयत् तममिति। स चात्र तमसः सदसद् विचारः खल्वप्रस्तुत-त्वादुपेक्षितो, न चाहं तत्र प्रगल्भे ॥७५॥

सितदीप्रमणिप्रकल्पिते यदगारे हसदङ्करोदसि।

निखिलान्निशि पूर्णिमातिथीनुपतस्थेऽतिथिरेकिकातिथिः॥७६॥

यस्या अगारे गृहे एकिका पूर्णिमातिथिरुपतस्थे। कदा? निशि। काननुप-तस्थे? तिथीन्। प्रतिपत् प्रभृतीन्। कियतः? निखिलान्। अतिथिरिति विधेयम्। पूर्णिमातिथिरनूद्यम्। सर्वासु तिथिषु चन्द्रातपसमुल्लासस्तत्रा-भूदित्यर्थः। यत्र कीदृशे? अङ्कस्य रोदोऽङ्करोदो मध्यागतं[1] द्यावाभूम्यो-रन्तरं मध्यं यस्य तस्मिन्। हसत् समुल्लसदङ्करोदो यस्येति क्रियमाणे व्यधिकरणासिद्धो बहुव्रीहिः स्यात्। केचित् तु द्यावाभूम्योर्वाचकं रोदः शब्दं

[56.a] सर्वकालद्विवचनवृत्तिमाहुः। किमित्येवमित्याह। यत्र कीदृशे सितैः शुक्लैः दीप्रैर्[2]दीप्तिमद्भिर्मणिभिः प्रकल्पिते। सामान्येन मणिशब्दो हि स्फटिक एव वर्तते। अन्यस्या अपि कस्याश्चिदतिथिवत्[3] प्रत्यहं[4] काचिदतिथिः प्रयाति, किं तु निशिसन्ध्यायामभ्यागतोऽतिथिरप्रणोद्यो भवति। रात्रौ तु विशेषतः। न विद्यते तिथिः कालविशेषो यस्येति ह्यतिथिशब्दस्य[5] निर्वचनम्।

1. B1. मधा- 2. B2. दन्ति- 3. B2. प्रियायां गृहे प्रत्यहं. 4. B2. प्रपातिथिः

5. B2. शब्दस्यानिर्वचनम्.

सर्वकालगतोऽतिथिः पूज्यः। अन्ये तु देवा अपि कालविशेषेण पूज्यन्ते। तेषां हि तिथयः संविभक्ताः सन्ति ॥७६॥

सुदतीजनमज्जनार्पितैर्घुसृणैर्यत्र कषायिताशया।
न निशाखिलयापि वापिका प्रससाद गुरुलेव मानिनी ॥७७॥

यत्र पुरि स्वत्यखिलयापि निशा यामचतुष्टयोपलक्षितयापि क्षिपया[1] वापिका[2] दीर्घिका न[3] प्रससाद, न नैर्मल्यमाप। कीदृशी सती? कषायितः श्वेत-रक्तीकृतः आशयो मध्यं यस्याः सा तथा। कैरीदृशीत्याह। घुसृणैः कुङ्कुमैः। कीदृशैः? सुदतीजनस्य विलासिनीलोकस्य यन्मज्जनं केलिवशात् बुडनं, तेनार्पितैः सङ्क्रामितैः। केव गुरुला दृढनिश्चयावात्तिकी मानिनीव मानवतीव। यथा सा समग्रयापि यामिन्या न प्रससाद, न नीरोषा बभूवेति सखेचित्तः। साऽपि न प्रससादेत्यर्थः। साऽपि कीदृशी? कषायितः सरागीकृत आशय-श्चित्तं यस्याः सा तथा। कैः? घुसृणैः। कीदृशैः? सुदतीजनमर्थात् प्रति-पक्षलोकं सुरतरतरभसवशान्मथ्नातीति सुदतीजनमत्। स चासौ जनोऽ-र्थान्नाथलक्षणस्तेनार्पितैर्दत्तैः शरीरं संसर्जितैर्वा। कषायं करोति कषाय-तीति इन्। ततः कर्मणि क्तः। कषायशब्दो मुख्यया वृत्त्या रसविशेष-वचनोऽन्यत्र तू[4]पचारवृत्त्या प्रवर्तते। सा चोपचारवृत्तिर्मुख्यार्थबाधे यथा-[5]योगं गौणीलक्षणादि[6]भेदवती भवतीति ॥७७॥

क्षणनीरवया यया निशि श्रितवप्रावलियोगपट्टया।
मणिवेश्ममयं स्म निर्मलं किमपि ज्योतिरबाह्यमिज्यते ॥७८॥

---

1- B1- क्षपया. 2. B2. तापिका. 3. B2. न. 4. B2. पचार.
5. B2. -योग्यं. 6. B2. भवेद्वती.

यया पुर्या निशि किमप्यनिर्वचनीयस्वरूपं निर्मलं रागद्वेषादिमलरहित-
-मबाह्यमाभ्यन्तरं ज्योतिः परमात्मस्वरूपं धाम नूनमिज्यते स्म, सङ्गतं
कृतं ध्यानकुसुमैः पूजितं वा। कीदृक्? मणिवेश्ममयम्। [1]शतदषन्मन्दिररूपम्।
कीदृश्या? श्रितः परितो निबद्धो वप्रावलिः प्राकारकुण्डल्येव योगपट्टो
ध्यानोपकरणविशेषो यया। तथा निर्गतो रवः शब्दो यस्याः सा तथा, तया।
एतस्यां हि निशीथ एव यदि परं निःशब्दता ध्यानस्था निशि योगिनी
खल्वेवमेव भवति। स्फटिकमणयश्च परमात्मज्योतिरिव सहजसौम्यं शुद्धं
[56.b] च भवति। श्रितेति पदस्थाने [2]सितेति पाठे तु षिञ् बन्धने सितो बद्धः॥
॥७८॥

विललास जलाशयोदरे क्वचन द्यौरनुबिम्बितेव या।
परिखाकपटस्फुटस्फुरत्प्रतिबिम्बानवलम्बिताम्बुनि ॥७९॥

या पुरी क्वचन कस्मिन्नपि जलाशयोदरे प्रतिफलिता द्यौरिवामरलोक
इव विललास [3]पुस्फोर (प्र)। कीदृशे जलाधारमध्ये। परिखाकपटेन जलखातिका-
-व्याजेन स्फुटं [4]प्रकटं स्फुरद्भासमानं प्रतिबिम्बेन प्रतिमूर्त्या अनवलम्बित-
-मस्पृष्टमम्बु यत्र तस्मिन्। यथैव द्यौस्तथैवेयमस्ति। बिम्बप्रतिबिम्बौ विना
तु नितान्तसाम्यं क्वचिन्न दृष्टम्। इह च दृश्यते। यथैव ह्यागमेषु
दिवो गुणा वर्ण्यन्ते, तथैव समस्ताः सन्ति। इयं च साक्षात् द्यौर्न भवति।
अपि तु, कस्मिंश्चिदविज्ञातविशेषे मृत्तकादिसीमावलयरहिते जलाधारमध्ये
प्रतिफलितास्ति। न हि यावद् बिम्बप्रतिबिम्बनिमित्तं वस्तु मुकुरादि [5]तावानेव
प्रतिबिम्बो भवति। किं तु ततो लघुप्रतिबिम्बनिमित्तस्य जलाशयजलस्य नूनमस्याः
समन्ततोऽवस्थितिर्न तु जलखातिकेयमिति जलदुर्गता कथिता सम्पच्च ॥७९॥

---

1. B2. सितवृष. 2. B2. सतिति. 3. B2. मुस्फोर. 4. B2. मकरं. 5. B2. तथानेव.

व्रजते दिवि यद्गृहावली चलचेलाञ्चलदण्डताडना ।
व्यतरन्नरुणाय विश्रमं सृजते हेलिहयालिकालनाम् ॥८०॥

यस्याः पुर्या गृहाणामावल्यः पङ्क्तयस्तत्र चलचेलाञ्चला ये दण्डास्तेषां ताडना आघाता अरुणाय सप्ताश्वसूताय विश्रमं संवाहनां व्यतरन् ददुः । किं कुर्वते ? दिवि नभोमार्गे स्वर्ग एव वा व्रजते । यत्र हि भगवान् विवस्वानस्ति यथा कथञ्चित् सा द्यौरेव । किं कुर्वते ? स्मै ? हेलिः सूर्य-स्तस्य हयानां कालनां नोदनां कुर्वते विदधानाय । अत एव विश्रामस्थान-रहिते शून्यमार्गे सप्तसप्तिप्रेरणम् । प्रवयणेनाजस्रं कुर्वतोऽस्य श्रमः । तत् कार्यस्य फरफरायमाण चीनवसनान्तोपलक्षितदण्डाघातैरेव कृतत्वात् । संवाहन-दाने चतुर्थी । चलानि चेलाञ्चलानि येषां ते च ते दण्डाश्च । अश्वानां हि ताडनं चलचेलाञ्चलसदृशचर्मखण्डोपलक्षिताग्रचर्मयष्ट्या क्रियते । उच्चतोक्तिः ॥८०॥

क्षितिगर्भधराम्बरालयैस्तलमध्योपरिपूरिणां पृथक् ।
जगतां खलु याखिलाद्भुताजनि सारैर्निजचिह्नधारिभिः ॥८१॥

या क्षितिगर्भे भूमिमध्ये धरायां भूमौ अम्बरे खे च ये स्थल्यालया गृहास्तैर्जगतां सारैरजनि कृता । केषां जगतामित्याह । पृथक् प्रत्येकं तलमध्यो-परिपूरिणां पातालभूवलयस्वर्लोकनाम्नां भूर्भुवः [57.b] स्वरित्येषा-मित्यर्थः । कथं ज्ञायते तेषां स्थिरांशैरियं निर्मितेत्याह । निजानि चिह्नानि धारयन्तीत्येवंशीलास्तैः । उक्तानि जगत्येव सारभूतानि निजवस्तूनि बिभ्राणानि । एतेन ततोऽपि गृहाणां वैशिष्ट्यमुक्तम् । यानि वस्तूनि पाताले प्रधानतया प्रसिद्धानि, तानि भूमिमध्यसृष्टेषु गृहेषु सन्ति । यानि भूमौ तानि मध्य-गृहेषु, यानि तु दिवि तान्युपरितनभवनेष्विति । श्रीमतोक्ता ॥८१॥

दधदम्बुदनीलकण्ठतां वहदत्यच्छसुधोज्ज्वलं वपुः ।

कथमृच्छतु नाम यत्र न क्षितिभृन्मन्दिरमिन्दुमौलिताम् ॥८२॥

यत्र क्षितिभृन्मन्दिरं राजसदनमिन्दुमौलितां चन्द्राभरणत्वं शम्भुभावं नाम भो कथं न ऋच्छतु । अपि तु युक्तं प्राप्नोतु । यतः किं कुर्वत् । अम्बुदनील-कण्ठतां दधत् । अच्छसुधोज्ज्वलं वपुर्वहत् । य एव ह्येवं गुणयुक्तः स एव भगवान् शम्भुः । छलोक्तिभङ्ग्या खल्वेवम् । तत्त्वतस्तु इन्दुर्मौलौ शिखरे यस्योच्चत्वात् स इन्दुमौलिः । तस्य भावम् । अम्बुदैर्नीलः कण्ठो यस्य तस्य भावं दधत् । यस्य हि शिरस्युन्नततया चन्द्रस्तस्य कण्ठ-समाश्रया मेघा इति युक्तमेव । मेघानां ततोऽधस्ताद्वर्तित्वात् । सुधया च कक्कोलकल्केनाच्छेनामलेन धवलितत्वादुज्ज्वलं शुभ्रं वपुर्वहत् । शम्भोश्चन्द्र-संबन्धादिन्दुमौलितान्बुदवन्नीलकण्ठताऽच्छसुधावदुज्ज्वलता च प्रसिद्धैव ॥८२॥

बहुरूपकशालभञ्जिकामुखचन्द्रेषु कलङ्करङ्कवः ।

यदनेककसौधकन्धरा हरिभिः कुक्षिगतीकृता इव ॥८३॥

बहूनि रूपकाणि प्रतिच्छन्दका यासां ता एवंभूता याः शालभञ्जिका रत्नकाष्ठादिनिर्मिताः पुत्तलिकास्तासां मुखान्येव चन्द्राः चारुत्वात् तत्र ये कलङ्करङ्कवश्चिह्नमृगास्ते यस्याः पुर्याः । अनेककानि सौधानि तेषां कन्धरासु ग्रीवादेशेषु ये सुवर्णादिमया हरयः सिंहास्तैः कुक्षिगतीकृता यथा । अत्र चन्द्रत्वेनाकृष्टा मृगास्ते च नोपलभ्यन्ते । क्व ते गता इति विचारणायां परकोटिमारूढायां सततसन्निहितैरेभिरेव गलिता इति सम्भावना । एवशब्दो निश्चये वा । पाञ्चालिकानां तु स्त्रीत्वात् कान्तिमत्तयाऽन्यवदिहापि चन्द्रत्वरूपणं युक्तमेव । एवमन्यदप्यभ्यूह्यम् । एतेन नानाविधभवनमण्डल(न)वैचित्र्यकथनम् ॥८३॥

बलिसद्मदिवं स तथ्यवागुपरि स्माह दिवोऽपि नारदः।
अधराथ कृता ययैव सा विपरीताजनि भूविभूषया ॥८४॥

बलिसद्म पातालम्। तामेव दिवं स नारदो मुनिरेकस्मिन्नितिहासे[1] दिवो-ऽप्युपर्यादृ स्माब्रवीत्। यद् बलिसद्म सा द्यौरेव, सा च बलिसद्मरूपा द्यौ-रेतस्याः प्रसिद्धाया दिव उपरि वर्तत इति तद्वचनं चर्चित्वाद् विशेषतो ब्रह्मपुत्रत्वात् तथैव। ननु[2] स आगमः। प्रत्यक्षतस्तु व्यत्ययः। साम्प्रतं हि पातालं द्यौरधस्ताद्या च स्वर्गाख्या द्यौर्नारदेनाधःस्थोक्ता। सा चोपरि तत् किमेतत् जानीम साम्प्रतमेतया स्वल्पद्भूतगुणविशिष्टया नगर्या। अथै-तस्मात् संविधानादनन्तरं निर्मितयाधःकृता बुद्ध्वा क्षिप्ता तले नीता सती विपरीता परिवर्तरूपाऽजनि जाता[3]। यया च भूविभूषया अलङ्कारत्वेन भूम्यां स्थितयेत्यर्थः[4]। अत्र सूक्ष्मतरश्छलोक्त्यर्थः। नारदवचनं सत्यमेव। उपरि बलि-सद्म द्यौस्तस्या अधस्तादेव भवनं द्यौः। तस्या अधस्ताद् भूलोकस्तन्मण्डनं वर्ण्यमानेयं नगरी। तया क्रमेणाधस्तात् स्थिते तृतीये स्थाने स्थितयापि। अधः-[5]कृता बुद्ध्वा क्षिप्ता सती सा बलिसद्मद्यौर्व्यतिक्रमवृत्तिर्जाता। एको भूमौ भवति। द्वितीयस्तदुपरि स्कन्धारूढो भवति। एवं स्थितेषु तेषु बुद्धवर्तमाना-श्रितेन केनापि केनापि प्रकारेण सर्वोपरि वर्तमानोऽपि पातयित्वा यदि स्वस्याधः क्षिप्यते तदा तस्यावश्यं वैपरीत्यं भवति। तत्त्वतस्तु बलिर्नाम दानवस्तस्य सद्म भवनं, यत्रासौ निवसति। तच्च स्वैरचरेण[6] नारदेन दृष्टं तस्य रामणीयकं प्रसिद्धया दिवा समं किञ्चित् कियदपि चाधिकमपि।

1. B2. इतिहासे. 2. B1. तनु. B2. न तु. 3. B2. जाती. 4. B1. स्थित्वा.
5. B2. अतः 6. B2. सैर-

अथ स मुनिस्ततः कस्यापि भूभृतः समीपं जगाम। तेन यथावदर्चयित्वा पृष्टः कुतो भगवानस्माननुगृहीतवानिति। तेन विज्ञापितः स मुनिस्तं प्रत्युवाच पातालादिति, किं तत्र प्रयोजनं भगवत इत्युक्ते राज्ञा, तेनोक्तं बलिदर्शनं, तदनुचिन्त्यमानेन राज्ञा पुनः प्रोक्तम्। ईदृशोऽस्ति बलिर्यस्य दर्शनं भवन्तोऽप्याकाङ्क्षन्ति। अथ मुनिराह- किमुच्यते बलिर्यस्य वेश्मापि गुणैर्धौरेव। अथवा किमत्युपरिष्टादपीति पूर्वमेवं बलिसद्मनो दिवो महत्त्वात् प्रसिद्धाया दिव उपरि स्थितिः। अथ वर्ण्यमानया पुर्या गुणैः साऽपि बलिसद्मद्यौरधः कृता जितेति ॥८४॥

प्रतिहट्टपथे घरट्टजात्पथिकाह्वानदसक्तुसौरभैः।

(ध) (त्थि)

कलहान्न घनान्यदुच्छ्रितादधुनाप्युज्झति घर्घरस्वरः ॥८५॥

(त्थि)

यत् तच्छब्दावत्र गम्यौ। प्रतिहट्टपथे सर्वेष्वापणमार्गेषु घरट्टजाद्यदुच्छ्रितात् कलहाद्धो घर्घरः स्वरः सोऽधुनाऽपि नोज्झतीति निश्चयः। यस्यां नगर्यां घरट्टमूले य उद्गतः कलिस्तस्माद्धो गम्भीरघर्घरो[1] ध्वनिः, स एवायं सम्प्रत्यपि मेघानामनुभूयत इत्यर्थः। कैर्हेतुभूतैरुच्छ्रितादित्याह। पथिकेभ्य आह्वानं ददत्येवंरूपाणि यानि सक्तूनां सौरभाणि घ्राणत-[58.a]-र्पणा गन्धास्तैः। प्रावृड्मुखे समुन्नता मेघाः प्रोषितानागृह्य (ह्य) तदागमसमुत्सुकप्रेयसीसमधिष्ठितं तद्गृहं त्वरितं नयन्तः सन्ति। पथि क्रमात् ते कुण्डिनस्य मध्ये भूयः चलिताः सन्तो घरट्टैः सक्तुसौरभैः कृत्वा समाहूताः। इमानस्माकमीदृशान् सक्तून् भुक्त्वा[2] गम्यतामेवं सति क्षणं विलम्बोऽपि भवतु भवतामिति। ततस्ते तान् प्रति प्रचलिता मेघाश्च निरुध्य पुरश्चालयन्तीति व्यतिकरे परस्परं तेषां विवादो जातः। स एव कलहस्तस्माद् वा कलह इति घरट्टा एव मूलं कलहस्य। यथा क्वचित् पर्वते शुष्कवंशपरस्परसंघर्षजोऽग्निरुत्तिष्ठते।

1. A. खर्खरो. B2. धिरो. 2. B1. भुक्ता.

उन्नतघनदर्शनात् त्वरयन्तोऽपि पान्थाः सौरभलोभेन सक्तूनपाराय प्रयान्ती-
-त्यर्थः। बलीयसा हेतुना परस्परविवादजनितकलहयोरन्ययोरपि स्वभावजडयो-
-श्चिरावस्थायिनी घर्घरस्वरता भवत्येव। घरट्टेष्वपि हि साधापि दृश्यते।
कश्चिदयं प्राच्य इति प्रस्तुते नगरेऽस्यार्थस्यासम्भवेऽपि स्वदेशानुभवादेतदुक्त-
-वान्। भातिरियं सक्तुगता ग्राम्यापि कौतुकाद् वास्यं जनयतीति। क्वचिदेव
युक्तैव। घर्घरस्वर इति समासोऽत्र न युक्तः। न कर्मधारयो बहुव्रीहि प्रति-
-पत्तिकरः प्रयोज्य इत्युपदेशात्। घर्घरः स्वरो यस्येति प्रतीतेः। तथा सति
घर्घरस्वरता नोज्झतीति वक्तुं युक्तम्। सहृदयैस्तु निपुणीभूय विमृश्य[1]
समासोऽत्र युक्त उतायुक्त इति। प्रतिहट्टपथ इत्यत्र वा तृतीयासप्तम्योरित्याम-
-भावो विकल्पितः। घरट्टः स्थूलपट्टमयं प्रस्तरघटितं मालवादिप्रसिद्धम्।
पेषणोपकरणं[2] चक्रिका[3] प्रतियोजि ॥८५॥
(पी)

वरणः कनकस्य मानिनीं दिवमङ्कादमराद्रिरागताम्।

घनरत्नकपाटपक्षतिः परिरभ्यानुनयन्नुवास याम् ॥८६॥

कनकस्य वरणः स्वर्णमयः प्राकारः स्वत्वमराद्रिः यां नगरीं मानवती-
-त्वादङ्कादागतां दिवमेव परिरभ्याश्लिष्यानुनयन् प्रसादयन्नुवास चिरं तस्थौ।
कीदृशानि[4] घनानि रत्नानि यत्रेति ते निरन्तरं नानाविधपद्मरागादिखण्डे ये
कपाटे अरैरे ते एव पक्षती यस्य स तथा। स्वर्णमयत्वादेवंभूतकपाटत्वाच्च
प्राकारस्यामराद्रित्वमनुमितं अमराद्रित्वादेव पक्षतिसद्भावात् सहजस्थावरत्वेऽपि
कदापि कामतश्चलनं स्वर्गधर्माणां प्रत्यक्षतयोपलभ्यमानत्वान्नगर्या ध्रुत्वम्।
अङ्कस्थितत्वादस्य मेरोर्नायकस्य[5] नायिकात्वम्। मानिनीत्वात् पुरुष्य स्थानान्तरगमनम्।

1. B2. निमृश्यं. 2. B1. पेषणो – B2, & पीषणो – 3. B2. वक्तिका –
4. B2. कीदृशी. 5. B2. नायक.

तथा संविधानादाश्लेषपुरस्सरं प्रसादनार्थं चिरस्थितिश्चानुमीयते। मानश्चित्त-
-समुन्नतिः। सन्निवेशप्रमाणं च तस्त्वतस्त्वेतदेवात्र, न [58.6] तु पूर्व:।
द्विधा सम्यक् सादृश्यकथनम्। भङ्ग्यन्तरेण वर्ण्यमानत्वान्नात्र पौनरुक्त्यम्।
एवमन्यत्र ॥८६॥

अनलैः परिवेषमेत्य या ज्वलदर्कोपलवप्रजन्मभिः।

उदयं लयमन्तरा रवेरवहद्बाणपुरीपरार्ध्यताम् ॥८७॥

या पुरी बाणासुरपुरीसौन्दर्यं दधे। कदा रवेरुदयमुद्गमं लयमस्तं
चान्तरा। सूर्यस्योदयास्तयोर्मध्ये। समस्तं वासरमित्यर्थः। किं कृत्वा? ज्वलन्तः
सूर्यकरसंस्पर्शाद् दीप्यमाना येऽर्कोपलाः सूर्यकान्तयस्तेभ्यो जन्म येषां तैरनलै-
-रग्निभिः परिवेषं वलयमेत्य प्राप्येति। कस्यापि प्राकारस्य सूर्यकान्तमयत्व-
-कथनम्। भवन्ति च पुरीषु वप्रः प्राकाराः। बाणपुरी किल ज्वलदनलदुर्गा
बभूव। एष चार्थ इतिहासेषु। उदयं लयमन्तरेऽन्तराशब्दयोगे द्वितीया ॥८७॥

बहुकम्बुमणिर्वराटिकागणनाटत्करकर्कटोत्करः।

हिमवालुकयाच्छवालुकः पटु दध्वान यदापणार्णवः ॥८८॥

यस्या आपण एवार्णवः पटूच्चैर्यथा स्यादेवं दध्वान जगर्ज। कीदृश
इत्यब्धिधर्मसद्भावमाह। बहवः कम्बवः शङ्खा मणयश्च यत्र स तथा। तथा
करगणनासंबन्धात्तल्लब्धानां वराटिकानां कपर्दिकानां गणनावसरेऽटन्त इत
इतो व्याप्रियमाणा ये कराः पञ्चशाखाः स एवातिसादृश्यात् कर्कटानां
कुलीराणामुत्करो राशिर्यत्र स तथा हिमवालुकया कर्पूरेण कृत्वा। अच्छा
सतत क्षालितत्वात् तारा चकचकायमाना वालुका सिकता यत्र स तथा। समुद्रत्व-
-रूपणनिमित्तवस्तुप्राचुर्यकथनम्। तच्च समुद्रे स्वत एव। अत्रापि जातिरूपकयोः
संसृष्टिः। "घनसारश्चन्द्रसंज्ञः कर्पूरो हिमवालुका" इति ॥८८॥

यदगारघटाटकुट्टिमस्रवदिन्दूपलतुन्दिलापया ।
मुमुचे न पतिव्रतौचिती प्रतिचन्द्रोदयमभ्रगङ्गया ॥८९॥

अभ्रगङ्गया[1] नभोनद्या । पत्युर्व्रतं[2] यस्याः सा पतिव्रता, तस्या औचित्यं रीतिर्न मुक्ता । कदा ? प्रतिचन्द्रोदयं चन्द्रोदयेषु । कीदृश्या ? यस्या अगाराणां वेश्मनां घटाः पङ्क्तयस्तासामग्र्य उपरितना[3]पवरकास्तत्र यानि कुट्टिमानि बहुभूमिकानि तत्र ये स्रवन्त्यिन्दूपलाश्चन्द्र[4]कान्तास्तैरम्बुभूतैस्तुन्दिला[5] बहुलिता आपो जलं यस्यास्तदेत्यप्[6] शब्दात् राजादित्वाटटन्तता । अत्र चैवं[7] पतिव्रताया एष धर्मो यत् पत्युरुपचये[8] सत्युपचयोऽपचये चापचयः[9] । पतिव्रताः पत्युर्दुःखेन दुःखिताः, सुखेन सुखि-[59.a]-ता[10] भवन्तीत्यर्थः । तत्र दिने जलाशयानां रविकरव्यतिकराच्छोषः सम्भवत्येव । यत्र गङ्गानदी, तत्र पतिव्रताधर्मोऽस्ति । तस्याश्च पतिः समुद्रो नदीत्येनाकृष्टः । स च चन्द्रोदये किल वर्धते । इयम-प्युक्तया (-प्युपलया, -प्युदकया) युक्त्या[11] वर्धते । एवं च पतिव्रताधर्मो यस्या न हीयते । अत्र घटातुन्दिलशब्दौ ह्युपचारेण प्रयुक्तौ । स चोपचारः[12] प्रचुरप्रचारो गौणीलक्षणादिवृत्तिभेदात् । तत्र किञ्चिदत्र सन्निवेश्यते । घटाशब्दः करिघटनायां प्रयुज्यमानो मुख्यस्तत्र मुख्यतया सङ्केतितत्वात् । करिधर्मयोगात् करिसदृशपदार्थे वर्तमानो गौणः । घटाशब्देनात्रागाराणां करित्वमाकृष्टम् । करिणश्च प्रायेण मेचका भवन्ति । गृहाश्चैते धवला इति परम्परया युक्त्या तेष्वैरावणत्वमाकृष्टम् । ऐरावणः किल धवलः । तस्य चात्र सम्भवोऽभ्रगजत्वात् । स हि किलाभ्रवासी ।

---

1. Br. -गङ्गतया. 2. Br. पशु- 3. Br. -तनापचरकासूत्रर्याभि. 4. Br. -चंकांता-
5. Br. -तुन्दिता. 6. Br. यस्य सूयेत्यप्. 7. Br. नैवं. 8. Br. पपुरुषवचे.
9. Br. वाऽपचयः. 10. Br. om. सुखेन सुखिता. 11. D. युक्त्या. 12. Br. सत्योपचारः

एते च गृहा अभ्रवासिनो मण्डलवर्तित्वादभ्रं खं तद्वर्तित्वाद् वा। मन्ये खल्वैरावणोऽपि नभोवासित्वादेवाभ्रगजः। तथा च लोकोक्तिः। येयं[1] निशि नभसि दक्षिणोत्तरगामिनी[2] सरणिरिव दृश्यते, सोऽयं सुरगजमार्ग इति। तथा तुन्दं विद्यते यस्यासौ तुन्दिल इत्यतिशायने[3] इलः। स च तुन्दस्यातिशयो मधुररुचित बहु-भोजनोपचितमेदः सम्भूत एव प्रायो दृश्यते। इन्दूपलाश्चेन्दुकरसमवायात्[4] स्रवन्ति। इन्दुकरेषु च किलामृतम्। एवं परम्परया प्राप्तेनामृतेनास्या अपां मेदसो वृद्धिस्तेन च तुन्दवृद्धिः। तत एवासां तुन्दिलत्वामिति स्थितम् ॥८९॥

रुचयोऽस्तमितस्य भास्वतः स्खलिता यत्र निरालयाः खलु।
अनुसायमभुर्विलेपनापणकश्मीरजपण्यवीथयः ॥९०॥

यत्र विलेपनापणकश्मीरजपण्यवीथयो नूनं भास्वतः सूर्यस्य रुचयोऽभुः भान्ति स्म। कीदृशस्यास्तमितस्य। अत एव कीदृश्यः? निरालयाः निराधाराः। अत एव स्खलिताश्च्युताः। आधाराभावे चाधेयमवश्यं पततीति। कुङ्कुमाधिक्य-कथनम्। विलेपनं समालम्भनयोग्यं[5] कल्कितश्लक्ष्णकुङ्कुमचूर्णादि। तदा समन्तात् पण्यते, क्रयविक्रयविषयीक्रियते यासु ताश्च ताः कश्मीरजस्य कुङ्कुमस्य वीथयो विपणयः। अथवा विलेपनस्यापणा निषद्या अनुसायं सन्ध्यायामिति[6] तदा विलेपनस्य प्रायेण प्रसारितत्वात् ॥९०॥

विततं वणिजापणेऽखिलं पणितुं यत्र जनेन वीक्ष्यते।
मुनिनेव मृकण्डुसूनुना जगतीवस्तु पुरोदरे हरेः ॥९१॥

---

1. B1. ययं, B2. येयं. 2. B2. –वासिनी. 3. B2. इत्यतिशायो नलः
4. B2. समवायाद्. 5. B2. भ यो न ग्यं. 6. B2. संधायामिति.

यस्यां जगर्थामखिलं जगतीवस्तु वसुधागतं पदार्थजातं जनेन पुरा वीक्ष्यते दृश्यते स्म । पुरा योगेऽतीते [59.b] वर्तमाना । कीदृशम् ? वणिजा वणिजकेन पणितुं व्यवहर्तुमापणे [1]निषधायां विततं प्रसारितम् । केनेव वेति जगतीस्थितस्य बहुभेदस्य वस्तुन एकनिषधादर्शने दृष्टान्तेन घटनमाह । मार्कण्डेयेन मुनिना पुरा पूर्वं जगतीवस्तु यथा हरेरुदरे दृश्यते दृष्टं वा तदा पुरेति सामान्येन पूर्वपर्यायः । उपमानार्थोऽयमागमशब्दः । मुनिपक्षे जगत्या जगतो वस्तु । जगती जगति छन्दोविशेषे[2]ऽपि क्षितावपि ॥९१॥

[3]सममेणमदैर्यदापणे तुलयन्सौरभलोभनिश्चलम् ॥

पणिता न जनारवैरवैदपि गुञ्जन्तमलिं मलीमसम् ॥९२॥

यस्या आपणे पणिता ग्राहकः एणमदैः सार्धं कस्तूरिकाभिः सहालिं भ्रमरं तुलयन् परिच्छिन्दन् नावैत् नावैति स्म । [4]ननु कस्तूरिकाया जात्यत्वाद् वर्णेन निकरबीजसंस्थानेन च [5]साम्यं [6]प्राप्तस्य भृङ्गस्य तैः समं तुलनं युक्तमेव भवेद् विशेषणाभावादित्यत्र स्थाने हेतुमाह । गुञ्जन्त-मपीति । कथं तर्हि न जज्ञावित्याह । जनारवैर्लोककलकलैः । ननु तस्य चेष्टाऽपि नष्टा । येन [7]न निष्टं कथयतीति तदभावमाह । यतः सौरभलोभेन घ्राणतर्पणगन्धाभिलाषेण निश्चलं विनिश्चेष्टमिति मृगमदजात्य[8]त्य बहुकथनं वचनं च ग्राहकस्येति ॥९२॥

रविकान्तमयेन सेतुना सकलाहर्ज्वलनाहितोष्मणा ।

शिशिरे निशि गच्छतां पुरा चरणौ यत्र दुनोति नो हिमम् ॥९३॥

---

1. B2. निषेधाशा. 2. B1. -विशेषे पक्षितावपि. 3. B2. समभ्रेण. 4. B2. न तु. 5. B2. सामान्यं. 6. B2. प्रासस्य. 7. B2. om. न. 8. B2. om. -त्य.

यत्र शिशिरे निशि गच्छतां हिमं कर्तृ चरणौ पादतले पुरा नो दुनोति, न दुनोति स्म। यतः केन कृत्वा ? गच्छताम्। रविकान्तमयेन सूर्यकान्त-क्लृप्तेन सेतुना। अलिपर्यायेण बन्धेन[2]। नन्वेवं सत्यत्यन्तं चरणतलयो-र्हिमोपतापो युक्तः। सर्वेषां पाषाणानां निशि नितान्तशीतलत्वादित्याह। सकलमहर्यज्ज्वलनं तेनाहितो न्यस्त ऊष्मा यत्रेति। ऊष्मणः[3] सद्भावस्तद्यपि क्रियान्यस्यैव ॥९३॥

विधुदीधितिजेन यत्पथं पयसा नैषधशीलशीतलम्।

शशिकान्तमयं तपागमे कलितीव्रस्तपति स्म नातपः ॥९४॥

यत्पथं शशिकान्तमयं चन्द्रकान्तक्लृप्तं विधुदीधितिजेनार्थान्निशि चन्द्र-करस्पर्शभवेन पयसा। नैषधशीलवन्नलस्वभाववच्छीतलं शिशिरम्। तपागमे उष्णर्तौ। आतप ऊष्मागमो न[4] तपति स्म। कीदृशः? कलियुगवत् तीव्रः कटुदुःखकरः। कलियुगं किल नितान्तसन्तापकमपि[5] शीतलशीलत्वान्नलं[6] न व्यथयति स्म। अत्यप्रस्तुतवर्णनेन कथानायको विस्मृत एव स्यादिति भङ्ग्या तन्नामोद्भवनम् ॥९४॥ [60-a].

परिखावलयच्छलेन या न परेषां ग्रहणस्य गोचरः।

फणिभाषितभाष्यफक्किका विषमा कुण्डलनामवापिता ॥९५॥

या नगरी परिखावलयच्छलेन खातिकावेष्टनव्याजेन विषमा दुर्बोधार्था फणिभाषितस्य भाष्यस्य पाणिनिव्याकरणाश्रितग्रन्थविशेषस्य फक्किका[7] गद्यरूपवाक्यविशेषरूपा कुण्डलनां वलयनमवापिता। किमित्येवं कृतेत्याह।

---

1. B2. om. नो दुनोति. 2. B1. बन्धनेन. 3. B2. ऊष्माणः. 4. B2. न पति. 5. B2. om. -न्ता- 6. B2. शीतलत्वात्. 7. B2. पथिका.

यतः परेषामन्येषां फणिव्यतिरिक्तानां ग्रहणस्य शब्दकृतावबोधस्य न विषयो,
न गोचरः। (न गोचरो, न विषयः।) शेषाहिं विहाय परैरसङ्ख्यैरपि सङ्ख्या-
-वद्भिर्व्याख्यातुं न शक्यते। तत्त्वतस्तु परेषां शब्दानां ग्रहणस्य लुण्ठनपूर्वस्य
स्वीकारस्य दुर्ग्राह्यत्वादियं पुरी न स्थानम्। फणिभाषितभाष्यफक्किका धर्मसद्-
-भावादियं सैवेति। अत्रैवं श्रूयते — "पुरा वररुचिर्नाम कश्चिद् देवमुनिर्मानुष-
-तनुमास्थाय भूमावयतीर्णवान्। स चाखिलं पाणिनीयं शब्दागमं पदप्रक्रियाविषयं
कस्मादपि गुरोरधिगतवान्। 'कुशाग्रीयमतित्वादभिमन्यमानस्त्वन्यन्न्यासादि तदर्थ-
-विशेषप्रकाशकमङ्गं यतस्ततो न शृणोमि; यदि कोऽपि बहुमुखो भूत्वा व्याक-
-रोति, तदाऽन्यस्मादपि शृणोमि' इत्याह स्म। ततस्तत् सतीर्थ्याः किलोल्लुण्ठन-
-पुरःसरं काक्वा समुपहसन्तः परस्परं प्रोचुरेष शेषादेव सहस्रमुखादेतच्छ्रोष्यतीति।
तेषां साकूतानि वचांसि विमृश्य प्रतिज्ञातवानेवमेवाहं करिष्यामीति। [1]अथ सार्थ-
-दैवतेन मन्त्रेण शेषमाराध्य प्रत्यक्षीचकार। 'किमर्थमहं त्वया समाराधितः' इति
तेन पृष्टः सन् स तस्मै न्यवेदयद् यत् तेन ततो जिज्ञासितं; ततो भगवता
शेषेण तत् तथेति तस्मै प्रतिश्रुत्य भूयः प्रोक्तम्। 'एककृत्वो व्याक्रियमाणं
शास्त्रार्थं यः समवधारयति तमहं शिष्यतामिह न यामि, न च साक्षाद् व्याचक्षे।
किं तु किमपि पटाद्यन्तर्धाय न हि तथाविधं मां भवान् द्रष्टुमर्हति' इति।
अथ तेन तथेति प्रतिपन्ने शेषः प्रतिज्ञापूर्वं व्याकरोत्। वररुचिस्तु तच्छुश्राव।
व्याख्याने प्रवर्तमानेऽन्तरपटं भित्त्वा तस्य विषमिश्राभिमुखसहस्रोद्गतवात-
-लहरीभिः प्रविमोहितः सन्नन्तरान्तरा नावधत्त। स चाविच्छिन्नं व्याख्यातवानेव।
पूर्णे च शास्त्रे, शेषः पातालं प्रति जगाम, वररुचिस्तु निजं स्थानम्।

---

1. B1. अर्थसार्थ — B2. अथ सार्थ —

अथ तच्चिन्तयन् वररुचिरश्रुतपूर्वत्वात् काङ्क्षामपि फक्किकार्थं न बुबुधे। कुतोऽन्ये विबुधा अपीति तासु फक्किकासु कुण्डलिकाः कृताः।" अत्र [1]लालायितः फणीति चिह्नं न पूर्वमथापि च पुस्तकेषु तास्तथैवाभिलिख्यन्ते। विषमा इति [६०.७] विषमत्वं समस्येति कृत्वा, अथ च विषं मान्तीति विषमाः। फक्कति नीचैर्मन्दं गच्छतीति फक्किका। यथा समानशब्दजमश्रुतावपि दीर्घात् समानात् सवर्णस्य लोपार्थमित्यत्र [2]त्रयो विश्रामाः ॥१५॥

मुखपाणिपदाक्षिण पङ्कजै रचिताङ्ग्येष्वपरेषु चम्पकैः।
स्वयमादित यत्र भीमजा स्मरपूजाकुसुमस्रजः श्रियम् ॥१६॥

यत्र पुरि स्मरस्य पूजायै कुसुमानां या स्रक् माला, तस्याः श्रियं शोभां स्वयं दमयन्त्येवादित। तस्याः स्थाने सैव बभूवेत्यर्थः। कीदृशी? रचिता [3]दृब्धा (निर्मिता)। कैः? पङ्कजैः। क्व? मुखपाणिपदाक्षिणि, वदनकरचरणनयनेषु। मुखं च पाणि च पदे चाक्षिणी च मुखपाणिपदाक्षि, तस्मिन्। प्राण्यङ्गत्वात् समाहारः। अपरेष्वेतदन्येष्वङ्गेषु चम्पककुसुमैः [4]क्लृप्तेति। विख्यातिशायिरूपकथनम्। कथाबीजभूतनायिकोद्बोधनं च ॥१६॥

जघनस्तनभारगौरवाद्वियदालम्ब्य विहर्तुमक्षमाः।
ध्रुवमप्सरसोऽवतीर्य यां शतमध्यासत तत्सखीजनः ॥१७॥

नूनं नाकवेश्या अवरुह्य यां नगरीमधिष्ठिताः। कास्ता इत्याह। तत् सखी-जनः। भैमी वयस्यालोकोऽयं न भवति, किन्त्वप्सरस एवैताः। कियत्यस्ता इत्याह। शतमसङ्ख्याः। यतः जघनं च स्तनौ च जघनस्तनं, तस्य भारो गौरवं तस्माद्-हेतोर्वियदमूर्तत्वाज्जभोऽवष्टभ्य रन्तुमसहा इति गम्योत्प्रेक्षया तत्सखीलावण्यातिरेककथनम् ॥१७॥

1. B2. लाभं लायितः, 2. B1. थो विश्रामः। 3 B2. दृब्धा. 4. B1. क्लृप्तेति.

स्थितिशालिसमस्तवर्णतां न कथं चित्रमयी बिभर्ति या ।
स्वरभेदमुपैतु या कथं कलितानल्पमुखारवा नया ॥९८॥

या नगरी चित्रमयी विविधाश्चर्यरूपा स्थित्या मर्यादया शालन्त इत्येवंशीलास्ते च ते वर्णाश्च ते विद्यन्ते यस्यां तस्या भावः स्थितिशालिसमस्तवर्णता[1] ताम् । किञ्च या स्वराणां तारादीनां भेदं विविधभावं कथं नोपैतु । यतः कथं भूता? कलितो धृतोऽनल्पः प्रचुरो मुखारवो यया सा तथा । यत्र हि बहुलो मुखारव-स्तत्रावश्यं स्वराणां विविधभावो भवति । अथवा या कलितोऽनल्पो[2] मुखारवो यया[3] सा तथा । तथा नया नूतना स्वराणां भेदं कथमुपैतु । यत्र ह्यनल्पो बहुलो मुखारवस्तत्र[4] संकीर्णत्वात् स्वराणां भेदो नोपलभ्यते । अथ चार्थान्तरम् । या चित्रमालेख्यं प्रस्तुतं यत्र सा चित्रमयी । स्थित्या यथास्थाननिवेशेन शालन्त[5] इत्येवं-शीला वर्णा रक्तपीतादयो विद्यन्ते यस्यां[6] तस्या भावस्तत्ता ताम् । तथा या नगरी स्वः स्वर्गो देवभेदमविशेषं कथं न चोपैतु । अपि तु दिवः साम्यं प्राप्नोतु । कीदृशी? कलितोऽनल्पमुखस्य ब्रह्मण आरवो वेदध्वनिर्यत्रेति । यत्र हि ब्रह्मा प्र-[61-a]-तिवासरं वेदध्वनिं करोति । स स्वर्ग एवेति भङ्ग्या श्लेषमुखेन वर्णनम् ॥९८॥

स्वरुचारुणया पताकया दिनमर्केण समीयुषोच्चकैः ।
लिलिहुर्बहुधा सुधाकरं निशि माणिक्यमया यदालयाः ॥९९॥

पद्मरागनिर्मिता यस्या आलया अनेकधा सुधया अमृतस्याकरं स्वनिमर्थशशधारं लिहन्ति स्म, बिडालवत् पपुः । कथा कृत्वा? निजत्विषा[7] कृत्वा लोहितया पताकया केतुवसनचीरिकया लेहनेन रक्तत्वेन च पताकया जिह्वात्वमाकृष्टम् । केन हेतुना स्वतृपिता[8] (उत्तृपिता) इत्याह । समस्तमहः सद्युतेजोष्णरश्मिना ।

1. B2. -वर्जितानाम् । 2. B2. व्याकलितो. 3. यथा । 4. B2. -सूत्र.
5. B2. शालन्ते. 5. शालजे. 6. B2. यस्या. 7. 5. om. निजत्विषा -----आकृष्टम् ।
8. B1. सुतृपिता. B2. स्वजितपिता. 8. स्वतृपिता.

तन्यतस्तु सुधाकरश्चन्द्रः। सुधा कक्कोलं वा। अन्योऽप्यतितृषितः सुधानामसाम्यात् तस्य करमपि लेढि लिहनंश्च बिडालादिगतं प्रसिद्धम् ॥९९॥

लिलिहे स्वरुचा पताकया निशि जिह्वानिभया सुधाकरम्।
स्थितमर्ककरैः पिपासु यन्नृपसद्मामलपद्मरागजम् ॥१००॥

पूर्वत्र श्लोके लोहितमणिक्लृप्तप्रभूतवेश्मवर्णनादतिव्याप्तेरवस्था स्यादित्यत्र तन्नियतविषयत्वमाह। अमलपद्मरागनिर्मितं यस्याः पुर्या नृपसद्म राजमन्दिरं सुधाकरं लिलिहे इति सुधाकरशब्दस्य श मुख्यार्थः। यतः सूर्यरश्मिभिः सह स्थितमत एव पिपासु स्यातितृषितम्। कदा लिलिहे? [1]निशि। कया कृत्वा? स्वस्यैव रुग् यस्याः सा स्वरुक्, तया पताकया जिह्वारूपया। अथवा स्वस्य रुगेव पताका, सैव जिह्वा। दिने चन्द्रस्य विच्छायत्वात् सुधाकरत्वोपादानादेव निशीति लब्धे तदुपादानमुक्तिप्रत्युक्त्यर्थम्। यो हि सकलं वासरं वह्न्यादिसंसर्गात् तृषितस्तिष्ठति, स निश्यपि यदि जलं न लभते, तदा क्लिन्नत्वात् सुधायाः कक्कोलस्याकरं स्थानमपि [2]लिहति ॥१००॥

अमृतद्युतिलक्ष्म पीतया मिलितं यद्वलभीपताकया।
वलयायितशेषशायिनः सखितामादित पीतवाससः ॥१०१॥

अमृतद्युतिलक्ष्म शशिलाञ्छनं कर्तृ। पीतया हारिद्रया यस्या वलभीपताकया सह मिलितं सत् कुण्डलितानन्ताहिसुप्तस्य पीतं वसनं निवासनस्य विष्णोः साम्यं लेभे। पीतं वासः सर्वकालं यस्येति स तथा भगवान् विष्णुरेव। किञ्च [3]वलयायितशेषशयनमस्यासाधारणं विशेषणं विष्णोस्तु श्यामता प्रसिद्धा। वलभीशलाकारूपा रेखादिक्लृप्तिः वरं डिकेति केचित् ॥१०१॥

---

1. B2. om. निशि ----- न लभते. 2. B1. लेढि. 3. B2. शेषशायितत्वमस्य.

अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा-
-जिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना
पूर्वं गाधिसुतेन सामि घटिता मुक्ता नु मन्दाकिनी
यत्प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि ॥१०२॥

यस्या नृपसद्मपट्टांशुकलतिका पवननर्तनैः खे व्यलसत्। इयमुत्प्रेक्ष्यते नु। मन्दाकिनी वियद्गङ्गा। कीदृशी? पुरा विश्वामित्रेणार्धसृष्टोज्झिता, यदि तेनेयं प्रथमं सृष्टा, तत् कुतः पश्चात् त्यक्तेत्याह। अश्रान्तमनवरतं श्रुतीनां वेदानां पाठेनाध्ययनेन पूताः पवित्रा रसना जिह्वा येषां तान्येवंरूपाणि तथा आविर्भूता विनिर्गता भूरयो बहुविधाः स्तवाः प्रशंसावाक्यानि येभ्यस्तानि[1]। अजिह्मानि प्रगल्भानि यानि ब्रह्मणो धातुर्मुखानि तेषामोघश्चतुष्टयी, तेन विघ्निता प्रत्यूहिता नवस्वर्गक्रियाया नूतननाकनिर्माणस्य केलिः क्रीडा यस्य तेन। यथा कश्चन बालः क्रीडावशेन किञ्चित् सृजति तथा तस्य क्रीडैव सेति प्रयत्नाभावः -सूचितो महत्त्वात्। पुरा किल सूर्यवंशजस्त्रिशङ्कुर्नाम राजा कुलगुरुं वशिष्ठ-मुपगम्य सानुनयमुवाच- "भगवन्नहं भवदनुग्रहा[2]दनेनैव देहेन नाकमधिरोढुमिच्छामि" इति। ततः स मुनिस्तं प्रत्युवाच- "वत्स! नायं क्रमः सृष्टेः[3] यदतिपुण्यवताप्यनेनैव [4]कायेन खलु नाकलोको विलोक्यते। तदलमनेनास्थाविषयेण दुराग्रहेण। किञ्चा-हमेवमपि कर्तुमीशे। किंतु तथा क्रमभङ्गः कृतः[5] स्यादन्येऽपि चैवमेव कामयेरन्"। ततः स श्रीयौवनमदमत्तत्वाद् भूयस्तमनुरुरुधे, स तु तन्मतं नानुमेने। अथ तेन सावेशिनेव[6] प्रोक्तम्- 'तर्ह्यहमन्यमेतत् कर्मक्षमं पुरोधसमन्वेषयिष्यामि' इति।

1. B2. om. येभ्यस्तानि. 2. B2. -गहणाद्- 3. B1. om. सृष्टेः. 4. B1. देहेन.
5. B1. om. कृतः. 6. B1. सावेशेनेव.

अथ वसिष्ठेन नितान्तकोपिष्ठेन "पाप मां कुलगुरुमनादृत्यान्यं गुरुं विधित्ससीशुनी-
-मेव त्वं चण्डालो भवति (भवेत्)" इत्येवं गुरुणा शप्तः। स तत्रैव सपदि
चण्डालो बभूव। अथ तेन रूपेणायोध्यां प्रवेष्टुं त्रपमाणः क्रोधमन्तर्दधानः स
वसिष्ठप्रतिपक्षमालक्ष्य विश्वामित्रं नाम मुनिसिंहमशिश्रियत्। यथावृत्तं चास्मै
सर्वं न्यवेदयत्। तदनु तेन गाधिनन्दनेन सानन्देन तस्य नाकगमनायेष्टिः
कर्तुमारब्धा। न[1] च प्रायो निमन्त्रिता ब्राह्मणास्तत्र किलायान्ति, न च देवा
यज्ञभागग्रहणाय, स्थाने स्थाने चोपहासः श्रूयते। "क्षत्रियो याजयिता, चाण्डालो
यजमान" इति। सम्यगियमिष्टिः क्रमवती फलवती भविष्यतीत्यथ यथोपसन्न
ऋत्विग्विनिवर्तित पूर्णाहुतौ यागे विश्वामित्रस्त्रिशङ्कुं निःशङ्कमिव प्रेषयन्[2],
स्वैरं दिवमारुहेत्यथ तं त्वरितमारोहन्तमुपरिस्थितः स्वर्पतिरुवाच – पापपते-
-त्येवं पुनः पुनरुक्तिप्रत्युक्तिरूपे विवादे जायमाने विश्वामित्रगोत्रामित्रयो-[3]
-र्विश्वामित्रणाद्भुततपोबलेनान्यैव सृष्टिः कर्तुमुपक्रान्ता त्रिशङ्कोर्नाकवासाय[4]।
अथ देवास्तस्य शक्तिमत्तां सम्भाव्य ब्राह्मणं पुरस्कृत्य गत्वा स [illegible]
प्रश्रयं स्तुत्वा च तमनुनिन्युः। शतमन्युश्चास्मै शक्रे द्यां भुवं चान्तरा पदं
ददौ। विश्वामित्रश्चारब्धामेव सृष्टिमेवं व्यरमयदिति ॥२०२॥

यदतिविमलनीलवेश्मरश्मिभ्रमरितभाः शुचिसौधवस्त्रवल्लिः।
अलभत शमनस्वसुः शिशुत्वं दिवसकराङ्कतले चला लुठन्ती ॥२०३॥

निर्मलधवलनृपभवनवसनलता सूर्योत्सङ्गभागविचेष्टमानाया यमुनाया बाल्यं
लेभे। ननु यदि सा नितान्तशुक्ला, तत्कथं दैत्यक्रोडक्रीडद्बालकलिन्दनन्दिनी
हेलामापेत्याह। यस्याः पुर्या अतिविमलानां नीलवेश्मनां रश्मिभिर्भ्रमरिता भ्रमरवर्णीकृता
भाश्छविर्यस्याः सा। शमनस्वसा यमुना तस्याः कार्ष्ण्यं प्रसिद्धम्।

1. B2. तै. 2. B2, D. प्रेषयत्. 3. B2. om. विश्वामित्रगोत्रामित्रयो. 4. B1, D. -पासाय.

अन्याऽपि बाला कन्यका प्रेम्णावश्यं पितुरन्तिके निःशङ्कं लुडति। गम्योत्प्रेक्षा ॥१०३॥

स्वप्राणेश्वरनर्महर्म्यकटकातिथ्यग्रहायोत्सुकं
पाथोदं निजकेलिसौधशिखरादारुह्य यत्कामिनी।
साक्षादप्सरसो विमानकलितव्योमान एवाभव-
-न्न प्राप निमेषमभ्रतरसा यान्ती रसाद् ध्वनि ॥१०४॥

अभ्रस्य मेघस्येव तरसा वेगेन काचिद् रागात् पतिगृहं यान्ती, निमेषं निमेषाख्यं कलांशं न प्राप। अभ्रशब्दं च नभो वाचकं, निमेषशब्दं च लोचन-सङ्कोचवाचकं, छलेनान्यथा समारोप्याह। यस्या नगर्याः कामिनी साक्षान्मूर्ता अप्सरस एवाभवन्, स्वर्वधूरेव बभूव। अर्थस्यैकत्वेऽप्यप्सरःशब्दो बहुवचनान्त एव। तस्य च विधेयत्वात् तदपेक्षयाऽभवन्निति बहुवचनम्। कामिनीति व्यनुद्येम्। आख्यातं च प्रायेणानूद्यमपेक्षते। क्वचिदपि विधेयमपि। कीदृश्योऽप्सरसः? विमानेन कलितं परिच्छिन्नं व्योम खं याभिस्ताः। विमानमधिष्ठाय व्योम्नि यान्ती स्वर्वेश्यावद् रेजे इत्यर्थः। ननु रूपातिशयेन तस्याः स्वत्वप्सरस्त्वमुपपन्नम्। विमानप्राप्तिः कुत इत्याह। पाथोदं मेघमारुह्य यान्ती। मेघाश्च नभोगामिनः। कथं ज्ञायते स्वत्विदं मेघमारुह्य गतेत्याह। यतोऽभ्रतरसा यान्ती। अभ्रं मेघस्तस्य तरसा वेगेन। विना हि विमानेनाभ्रे खे तरसा वेगेन गन्तुं न पार्यते। किञ्च पथि निमेषमक्षिसङ्कोचनं न प्राप। अप्सरसो हि निर्निमेषा, विमानेन च नभसि वेगेन यान्ति। ननु तया मेघः क्व प्राप्त इत्याह। निजक्रीडाभवनाग्रात् स्व-पतिरतिनिवासनिलं वसतकृति प्रतीष्टये समुत्कण्ठितम्। तं प्रदेशमुद्दिश्य प्रचलित-मित्यर्थः। पाथोदाहरणम्। तत्प्राप्तिस्वोक्तया युक्त्या अभ्रतरोयानेन निर्निमेषत्वेन
(पाथोदारोहणम्)
चानुमितेनाप्सरस्त्वेनाकृष्टमन्यथैवं संविधानं न सम्भवेत् ॥१०५॥

वैदर्भीकेलिशैले मरकतशि-[ख-ख]-खरादुत्थितैरंशुदर्भै-
-र्ब्रह्माण्डाघातभग्नस्यदजमदतया ह्रीधृतावाङ्मुखत्वैः ।
कस्या नोत्तानगाया दिवि सुरसुरभेरास्यदेशं गताग्रै-
-र्यद्गोग्रासप्रदानव्रतसुकृतमविश्रान्तमुज्जृम्भते स्म ॥१०५॥

यस्याः पुर्यां गोभ्यो यद् ग्रासस्य प्रदानं, तस्य व्रतं नियमस्तस्मात् तेन वा यत्सुकृतं पुण्यं तदुल्लसितम् । कैः? अंशव एव दर्भास्तैः । कीदृशैः? उत्थितैर्ग्रासैः । कस्मान्मरकतस्य मणिविशेषस्य शिखरात् कूटात् । क्व? भैमी-क्रीडानगरे । कीदृशैः? ह्रिया लज्जयैव धृतमुपात्तमवाङ्मुखत्वमधोमुखत्वं यैः । कया? ब्रह्माण्डेन ब्रह्मगोलकखण्डेन सह तत्र वा य आघात आस्फलनं तेन भग्नः खण्डितः स्यदो वेगो येषां तेषां भावस्तत्ता, तया । अत एव कीदृशैः? दिवि कस्याः सुरसुरभेर्देवगव्या आस्यदेशं मुखमध्यं न गताग्रैः प्रविष्टशिखैः[1], अपि तु सर्वासाम् । कीदृश्या उत्तानगायाः । उत्तानोपरिकृतोदरा गच्छतीत्युत्तानगा, तस्याः । देवानां गावः किलोत्ताना गच्छन्ति । 'उत्ताना वै देवगावो वहन्ति' इति श्रुतिरपि ( ) । यः कोऽपि सुकृतिः[ती] प्रतिवासरं गोभ्यो ग्रासं ददाति स [2]पर्वताग्रप्ररूढहरितदर्भदूर्वाङ्कुरान् स्वयमाहृत्य भक्त्या तन्मुखेषु निधत्ते । अस्यास्तु तत्प्रयत्नं विनैव विशिष्टतरं सिद्धम् । [3]कामगवीभ्योऽपि गोग्रासस्यापूर्वेण विधिना दीयमानत्वात् । तथाहि भैमीकेलिशैलशिखरोत्थितकिरणदर्भाग्राणि ब्रह्माण्डं भित्त्वा तत्परप्रदेशं गन्तुमुद्यतानि ब्रह्माण्डस्य दुर्भेद्यत्वाद् रभसवेगभङ्गोऽभवत्तो लज्जया तान्यधोमुखानि जातानि । तत्र च देवगव्य उत्तानगत्या भ्रमन्माणोपरि उच्चैर्मुख्यः सन्तीति प्रयत्नं विनैव तानि तन्मुखानि प्रविशन्तीति दर्भाङ्कुराग्राधो-मुखत्वे तु ब्रह्माण्डस्य दुर्भेद्यत्वमेव हेतुः । सलज्जत्वं तु सम्भावनामात्रम् ।

1. B2.-विशेषैः. 2. B2-पर्वतार्थप्ररूढ. 3. B2. कामगवीभ्यो । पागाग्रास.

देवगवीनामुत्तानतया गमनमपवरकादिच्छादनमसृणधरितधरणकाष्टतलेऽपि[1] पीत्तिकानामिव। अत्र च हंसस्य दर्शनादेऽसि तस्या नगर्यां वर्ण्यमानगुणानां वर्तमानत्वेऽपि कथयाभूतार्थत्वाद्[2] भूतनिर्देशः। कथा हि त्रिविधा- भूतार्था, वर्तमानार्था, भविष्यदर्था चेति ॥१०५॥

विधुकरपरिरम्भादात्मनिष्यन्दपूर्णैः
शशिदषदुपक्लृप्तैरालवालैस्तरूणाम्।
विफलितजलसेकप्रक्रियागौरवेण
× व्यरचि स हृतचित्तस्तत्र भैमीवनेन ॥१०६॥
~(व्यजनि)

तत्र पुरि स हंसो भैमीवनेन हृतचित्तोऽजनि जातः। तत्र तस्य निवेष्टुं स्पृहाभूदित्यर्थः। कीदृशेन? निष्फलीकृत जलपूर-[63.a]-णप्रकरणाधिक्येन। कैः? तरूणामालवालैः आधारैरेव। कीदृशैः? चन्द्रकान्तसंयोजितैः। अत एवेन्दु-रश्मिसंस्पर्शात् स्वस्रवणभृतैः। अत एव सन्ध्यास्वपरोपवनतरूणामिवादरकृतो[3] जलसेको विफलः। मालाकारादिभिः कूपादेर्जलमुद्धृत्य यत् सारणीभिर्यथा-युक्ति नानावृक्षकगुल्मलताविटपमूलान्युपनीयन्ते तज्जलसेकप्रक्रियागौरवम्। अथ च मनोहरं वनं सलिलमवश्यं दृष्टं हंसस्य मनो निजवशीकरोत्येव। 'वने सलिलकानने' ॥१०६॥

अथ कनकपतत्रस्तत्र तां राजपुत्रीं
सरसि सदृशभासां विस्फुरन्तीं सखीनाम्।
उडुपरिषदि मध्यस्थायिशीतांशुलेखा-
-नुकरणपटुलक्ष्मीमक्षिलक्ष्मीचकार ॥१०७॥

---

1. B1. बभूव---पवरकादि- 2. B2. कथाया- 3. B1. -रूपरोप-

अथ स्वर्णखगस्तत्र भैमीं वनितां राजपुत्रीं नृपकुमारीं समानरूपाणामालीनां सभार्थां विद्योतमानां ददर्श । नक्षत्रमण्डलान्तर्वर्ति चन्द्रकलानुकारक्षमश्रियम् । सख्य उडुसभाः । सा चन्द्रकलेव ॥१०७॥

भ्रमणरयविकीर्णस्वर्णभासा खगेन
क्वचन पतनयोग्यं देशमन्विष्यताधः ।
मुखविधुमदसीयं सेवितुं लम्बमानः
शशिपरिधिरिवोच्चैः मण्डलस्तेन तेने ॥१०८॥

अथ तेन खगेन मण्डलस्तेने[1] मण्डलाकृतिस्तेजो विस्तृतमिव[2], शशिपरिधितुल्यत्वात् । किं कुर्वता ? अधो भुवि क्वापि पतनार्हं भूभागं गवेषयता । कीदृशेन ? भ्रमणवेगविक्षिप्तकनककान्तिनेति जातिरलङ्कृतिः । कीदृशः ? लम्बमानः स्रंसमानः[3] । उच्चैरुच्चतरं[4] शशिनः परिधिरिव चन्द्रपरिवेषतुल्यम् । उत्प्रेक्ष्यते[5] । अमुष्या अयमदसीयस्तं मुखविधुं वदनचन्द्रं सेवितुम् । 'सोतुलं लम्बमानः' इति पाठे तु स तादृशो लम्बमानोऽतिविस्तीर्णो दीर्घो मण्डलस्तन्मुखस्यातुलत्वात् । कथं तेने तेन । अभितेनेति लक्षणे कर्मप्रवचनीयः तद्योगे द्वितीया । अथवा लम्बनक्रियाया व्याप्यतया मुखविधोः कर्मता ॥१०८॥

अनुभवति शचीत्थं सा घृताचीमुख्याभि-
-र्न सह सहचरीभिर्नन्दनानन्दमुच्चैः ।
इति मतिरुदयासीत्पक्षिणः प्रेक्ष्य भैमीं
विपिनभुवि सखीभिः सार्धमाबद्धकेलीम् ॥१०९॥

---

1. B2. om. मण्डलस्तेने. 2. B1. विसृतं. 3. B1, D. om. स्रंसमानः.
4. D. -तरं. 5. D. उत्प्रेक्षते.

हंसस्यैवं बुद्धिरुत्पन्ना। किं कृत्वा? केलिवनभूमावलिभिः सह स्थिरीकृतक्रीडा-
-रसां भैमीं दृष्ट्वेति। कथमित्याह। सा शची शक्रजाया [1]घृताचीमेनकारम्भाप्रभृतिभिः
सखीभिः [2]सममित्थ[63.b]मनया रीत्योच्चैरतिशयेन नन्दनवनकेलिसुखं नानुभवति। अपि तु
नूनमियं सैवेत्यर्थः। भैम्यां शचीभ्रान्तिस्तत् सखीषु घृताच्यादिसम्भावना क्रीडावने
नन्दनोत्प्रेक्षणमिति शुभम् ॥१०९॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
-काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥११०॥

द्वैतीयीकतया द्वितीयत्वेन मितः सङ्ख्यातः। द्वितीय एव द्वैतीयीकः। तीयान्ता-
-ट्ठीकण् स्वार्थे। एवं तार्तीयीकः। ततो भावे तप्रत्ययः। शेषं पूर्ववत् ॥११०॥

शाण्डिल्यनाम मुनिवंशकरीरकस्य,
श्रीधीरधीरतनयस्य गदाधरस्य।
कृप्तौ सुधामधुनि नैषधटीकिकायां
सर्गो द्वितीय इति सम्प्रति पूर्यते स्म॥

---

1. B2. घृतावीसेनका. 2. B2. सभित्थममानय.